नं० ५६६३८ — घ

प्रपञ्चसारः

पत्राणि ५१

तन्त्रम्

संपूर्णम्

ॐ श्रीगणेशायनमः ॐ नत्वाश्रीशंकराचार्यमम
१ रेंद्रयतीश्वरं कवेप्रपंचसारस्यसारसंग्रहमुत्तमं १
तत्रप्रपंचसारेयच्छंकराचार्यैरुक्तंमंत्रयंत्रप्रयो
गादितत्सर्वमेपिसारभूतमेवतथापीदानींमंदप्र
ज्ञानांविस्तरतोज्ञातुमनुष्ठातुंचाशक्यत्वादत्यंतो
पकारभूतत्वेनयत्सारतरंतदल्पग्रंथेनैवयथासर्वं
मंत्रयंत्रतंत्रसारग्रहणंस्यात्तथासर्वतःसारंगृहीत्वा
मयासत्संप्रदायसर्वस्वाभिधयाख्यानोक्तमार्गेणाव
द्यते तत्रयत्नःप्रसंगात्तत्रतत्रमंत्रकल्पान्तरे मंतत्रसा
रक्रमदीपिकासनत्कुमारीयशारदातिलकमंत्रदेव
ताप्रकाशिकादौयदुक्तंमंत्रयंत्रतंत्राद्युक्तंतदपिकिंचि
त्किंचिद्दृश्यते तत्रप्रपंचसारेप्रथमंतावत्तत्वानांवैशे
षपर्यंकशायिनंमहाविष्णुंप्रतिज्ञमादिभिस्त्रिमूर्ति
भिःस्तेषामुत्पत्त्यादिविषयःप्रश्नप्रकारःप्रथमेपटले
निरूपितःपुनर्विस्तृतानंतररूपेणत्रिगुणात्मिकाया
भुवनेश्वर्याःशारदायाःसकाशात्त्रयाणांब्रह्मादीनामि
तरेषांदेवादीनांचसर्ववैदिकतांत्रिकमंत्रयंत्रतंत्राणांचो
त्पत्तयोनिरूपिताःप्रथमपटलावशिष्टग्रंथैःसहद्वि
तीयादिभिस्त्रिभिःपटलैस्ततउपरिपंचमषष्ठयोःपट
लयोस्तुसर्वमंत्रसाधारणंदीक्षापर्यंमेदय १ मंडलनि

र्पणवास्तुबलिकलशपूजाहोमकलशाभिषेकगुरुस।
मर्पणमन्त्रोपदेशगुरुदक्षिणाद्रव्यादिप्रकारा उक्ताः।
तत्सर्वमिदानींतनैरतिप्रयाससाध्यत्वादननुष्ठीयमान
त्वात् ग्रन्थविस्तरभयाच्चात्र न लिख्यते तस्मात्तत्सर्वं मूल
ग्रन्थएवावलोकनीयं तदनुष्ठानेच्छुभिः दीक्षाशब्दार्थस्तु
मन्त्रेचैवोक्तः दद्याच्च दिव्यभावं क्षिणुयाद्दुरितान्यतो भवेद्दी
क्षा मननात्त्राणपदस्यत्रायत इति मन्त्र उच्यते भयतः॥ इति
दीक्षामहिमा मन्त्रमहिमा चोक्तः तत्र भयत इति भेदवासना
ग्रन्थिरूपत इति पुनरपि दीक्षाया अवश्यकर्तव्यता मन्त्रे चैवो
क्ता दैवादिकस्याप्यथमानुषादेः पैत्रादिकस्याप्यथवत्सर
स्य आह्निकमारभ्यसमग्रसंपद्यत्नेन दीक्षाविधिमारभेत
इति दीक्षाकालश्च तदवश्यकर्तव्यता चोभयमित्युक्तं क्रम
दीपिकायां चोक्तं ऋतेयथामन्त्रजापिनोपि सिद्धिं न यच्छ
त्यतिमन्त्रपूग इति यथा दीक्षयेत्सर्वः दीक्षाकालश्च क्रम
दीपिकायामुक्तः॥ चैत्रेकृत्वेतन्मासिकर्माद्युपदेशगुण
दैर्भ्रयो देशिकात्प्राप्यदीक्षां तेनानुज्ञातः पूर्वसेवां हि नी
येमासिद्वादशप्यामारभेतामलायामिति एवं क्रमदीपि।
कायां दीक्षाकाल उक्तः मेधादक्षिणामूर्तिकल्पेतु॥
दीक्षादिना विना मन्त्रं भक्तानां शीघ्रसिद्धिदमिति भक्तस्य
दीक्षानपेक्षा उक्ता च अथ पुनः सप्तमे पटले मात्रका

सरस्वतीविधानमुक्तं तदारभ्य सर्वमंत्रान् सर्षादि
२ कान् सांगान् ससाध्यान् सपूजाविधानान् सयंत्रा
न् सकलशविधानान् सपुरश्चर्याविधानान् सप्र
योगविधानांश्च वक्ष्ये तत्र ऋष्यादीन्यंगानि च मंत्रा
श्चाऽप्रसिद्धसमिद्द्रव्यफलानां नामानि चावरणमं
त्रांश्च स्वरूपेणैव वक्ष्ये यंत्राणि च प्रयोगांश्च सव्या
ख्यान् रूपेण वक्ष्ये तत्र प्रथमं तावन्मातृकादि सर्वमं
त्रजपारंभविधानमस्मिन्नेव शास्त्रे प्राक् षष्ठपटला
दौ अथ पुनरपि च संगृह्य: प्राग्वदनो विष्टरोपविष्टः स
न् प्राणायामं सलिपिन्यासं कृत्वेत्यादिग्रंथैरुक्तेन प्र
कारेण दर्श्यते वक्ष्ये प्रथमं शुद्धोदकेन स्नात्वा निर्मलव
स्त्रो धौतपाणिपादाननः आचांतः पवित्रकरः ऊर्ध्वपुं
ड्रमस्तको वा त्रिपुंड्रमस्तको वा प्राङ्मुख उदङ्मुखो
वा पद्मासने योनिमुद्रासने स्वस्तिकासने वोपविशे
त् पद्मासनप्रकारस्तु संमेलनगोपालन्यासविधा
ने उक्तः सव्यं पादमुपादाय दक्षिणोपरि विन्यसेत्।
तथैव दक्षिणं पादं सव्यस्योपरि विन्यसेत् विष्टभ्य क
रौ ग्रीवां नासाग्रन्यस्तलोचनः पद्मासनं भवेदेत
त्सर्वेषामपि पूजितमिति स्वस्तिकासनं तु योगशा
स्त्रे उक्तं जानूर्वोरंतरे कृत्वा सम्यक्पादतले उभे॥

अज्ञकायः समासीनः स्वलिंकं तस्य वर्त्तते योनिमुद्रा।
सनं तं शिवगीतायां मुक्तं सव्यपार्ष्णिं गुदे स्थाप्य दक्षिणं
च ध्वजोपरि योनिमुद्राबंध एवं भवेदासनमुत्तमं योनि
मुद्रासने स्थित्वा प्रजपेद्यः समाहितः यं कंचिदपि वा मं
त्रं तस्य स्युः सर्वसिद्धयः छिन्नाबद्धाः स्तंभिताश्च कीलिता
मूर्छितास्तथा सुप्ता मत्ता हीनवीर्या दिग्धास्त्रस्ता रिपक्ष
गाः बालयौवनमत्ताश्च वृद्धा मंत्राश्च ये मताः योनिमुद्रा
सने स्थित्वा मंत्रानेवंविधान् जपेत् तस्य सिद्ध्यंति ते मंत्रा
नान्यस्य तु कथंचनेति अथ दुष्टमंत्रोद्देशः अतल्लक्षणा
नि च शारदातिलकोक्तप्रकारेण लिख्यंते मंत्रविद्यावि
भागेन हि विद्यामंत्रजातयः मंत्राः पुंदेवता मंत्रा विद्याः स्त्री
देवताः स्मृताः पुंस्त्रीनपुंसकात्मानो मंत्राः सर्वे समीरिताः
पुंमंत्रा हुंफडंताः स्युर्द्विठंताः स्युः स्त्रियो मताः द्विठंताः
स्वाहांताः नपुंसका नमोंताः स्युरित्युक्ता मनवस्त्रिधा छि
न्नादिदुष्टास्ते मंत्राः पालयंति न साधकं छिन्नो रुद्धः शा
क्तिहीनः पराङ्मुख उदाहृतः वधिरो नेत्रहीनश्च कीलि
ताः स्तंभितास्तथा दग्धस्त्रस्तश्च भीतश्च मलिनश्च तिर।
स्कृतः भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्छितः हृतवी
र्यश्च प्रध्वस्तो बालकस्तथा कुमारश्च युवा प्रौढो वृद्धो।
निस्त्रिंशकस्तथा निर्वीजः सिद्धिहीनश्च मंदः कूटस्तथा

युतः निरंशः सत्वहीनश्चकेकरोवीजहीनकः धूमि
३ तालिंगितोस्यातंमोहितस्तद्वथार्त्तकः अतिहंसोग
हीनः स्यादतिकुद्धः समीरितः अतिक्रूरश्चसवीडःशां
तमानसएवच स्यानभ्रष्टस्तुविकलश्चातिहृष्टः प्र
कीर्त्तितः निस्नेहः पीडितश्चापिवक्ष्याम्येषांचलक्षणं
मनोर्यस्यादिमध्यांतेष्वानलंवीजमुच्यते संयुक्तंवा
वियुक्तंवास्वराक्रांतस्त्रिधायुतः चतुर्द्धापंचधावाथस
मंत्रः छिन्नसंज्ञकः स्वराक्रांतइतिअघोरेभ्योथघोरे चो
रेभ्योघघोरे घोरघोरतरेभ्यश्चहूं सर्वतः शार्वसर्वेभ्योहूं
नमस्ते अस्तुरुद्ररूपेभ्योहूं इत्युदाहरणं आदिमध्या
वसानेषुभूवीजिद्वयलांछितः रुद्धोमंत्रः सविज्ञेयोभु
क्तिमुक्तिविवर्जितः भूवीजंलकारः ह्रींमायात्रितत्व
श्रीवीजरावहीनस्तुयोमंत्रः त्रितत्वंप्रणवः ह्रुंकारो
वा एवः फ्रेंकारः शक्तिहीनः सकथितोयस्यमध्येन
विद्यते क्लींकामवीजंमायावेमायाशिवस्यंकुशमेववा
अंकुशः क्रोंकारः असौपराङ्मुखः प्रोक्तोयोमंत्रोविंदु
संयुतः आद्यंतमध्येविंदुर्वाभवेद्वधिरोमनः इंदुः
सकारः। पंचवर्णोमनुर्यः स्याद्रेफार्केंदुविवर्जितः
नेत्रहीनः। सविज्ञेयोदुःखशोककामयप्रदः आदिम
ध्यावसानेषुहंसः प्रासादवाग्भवौ प्रासादोहौंकारः

वाग्भवमैंकारः ह्रकारो विंदुमान् जीवो रावं चापि चन्द्र
कलं जीवः सकारः चन्द्रकलं हूंकारः मायाममामि
चपदं नास्ति यस्मिन् सकीलितः पकं मध्ये हयं मन्त्र
द्वियस्मिन्नस्त्र पुरंदरौ नविद्येते स मंत्रः स्यात्तांभि ॥
तः सिद्धिरोथकाः अस्त्रं फट्कारः पुरंदरो लकारः
वह्निर्वायुसमायुक्तो यस्य मंत्रस्य मन्त्र ईति। सप्तथाह।
श्यते तं तु दग्धं मन्वीत मंत्रवित् अस्त्रं हाभ्यां त्रिभिः
षड्भिरष्टभिर्हश्यते त्वैः ऊन्नः सोभिहितो यस्य मन्त्र।
त्वेन प्रणवः स्थितः शिवो वा शक्तिरथवा भीताख्यः
सप्रकीर्तितः शिवः ह्रकारः आदिमध्यावसानेषु।
भवेन्मार्णं चन्द्रमथयं यस्य मंत्रस्य मलिनो मंत्रवित्तैवि
नं विवार्जयेत् यस्य मध्ये दकारो वा क्रोधो वा मन्त्र ईति।
द्विधा क्रोधोहुंवीजं अस्त्रं तिष्ठति मंत्रः सतिरस्कृत
उदीरितः हयंप्रमन्त्रावेशीर्षं वषडस्त्रं च मध्यगं यस्यस्या
द्वेदितो मंत्रस्य पाज्यः सिद्धिभ्रष्टरिभिः त्रिवर्णो हंसदी
नोयः स्तुभमः सउदाहृतः मंत्रो वाप्यथवा विद्या सप्ता
धिकदशाक्षरः फट्कारपंचकादिर्यो मदोन्मत्त ईत्
रीरितः नहदस्त्रं स्थितं मध्ये यस्य मंत्रः सम्मूर्छितः ।
विरामस्थानगं यस्य हृतवीर्यः स कथ्यते पंचके त्व
त्रापि संवध्यते आदौ मध्ये तथा मन्त्र द्विचतुरस्त्रभूतो म

प्र॰ च॰ सा॰ ४ न्तः ज्ञानखोभीमः इत्येषयः स्यादष्टादशाक्षरः एको
नविंशत्यर्णोवायोमंत्रस्तारसंभृतः स्त्रलेखांकुशवी
जाद्यस्तंप्रचक्षते सप्तवर्णोमनुर्वालः कुमारोष्टाक्ष
रः स्मृतः षोडशार्णोयुवाप्रौढ स्त्वाविंशल्लिपिर्म
५ नुः त्रिंशदर्णस्त्वतः षष्टिवर्णोमंत्रः शताक्षरः चतुः
शताक्षरस्त्रापिवृद्धइत्यभिधीयते नवाक्षरोध्रुवस्तु
तोमनुर्निस्त्रिंशईरितः यस्यावसानेहृदयशिरोमं
त्रौचमध्यतः शिखावर्मचसंस्थानोवौषट्फट्कार
एववा शिवशक्त्यर्णहीनोवा सनिर्वीजइतिस्मृतः
एवस्थानेषुफट्कारः षोढायस्मिन्प्रदृश्यते स
मन्त्रः सिद्धिहीनः स्यात्मंदः पंक्त्यक्षरोमनुः पंक्ति
शब्दोदशवाचकः कूटएकाक्षरोमंत्रः सएवोक्तो।
निरंशकः द्विवर्णः सत्वहीनः स्यात्त्रवर्णस्त्वके
करः षडक्षरोवीजहीनः सार्धसप्ताक्षरोमनुः सार्ध
द्वादशवर्णोवानिंदितः सन्न धूमितः सार्धसप्तवा
दिग्रंतेव्यंजनयोगेनज्ञेयं सार्धवीजत्रयस्तद्वदेक।
विंशतिवर्णकः विंशत्यर्णस्त्रिंशदर्णोयः स्यादालिं
गितस्तुमः द्वात्रिंशदक्षरोमंत्रोमोहितः परिकीर्ति
तः चतुर्विंशतिवर्णोयः सप्तविंशतिवर्णकः स्तथा
र्तः सतविज्ञेयोमंत्रोदारिद्र्यदायकः एकादशाक्ष।

रोवापिपंचविंशतिवर्णकः त्रयोविंशतिवर्णोवामंत्रो
दृष्टउदाहृतः षट्त्रिंशत्पर्णकोमंत्रः षट्त्रिंशवर्णको।
पिवा त्रिंशदेकोनवर्णोवाप्यंगहीनोविधीयते अष्टा
विंशत्यक्षरोयएकत्रिंशदथापिवा अतिक्रूरः सग
दितोनिंदितःसर्वकर्मसु चत्वारिंशतमारभ्यात्रिष।
ष्टिर्यावदापतेत् तावत्संख्यानिगदितामंत्राःसर्वीड
संज्ञिताः पंचषष्ट्यक्षरायेस्युर्मंत्रास्तेशंतमानसाः
एकोनशतपर्यंतंपंचषष्ट्यक्षरादितः येमंत्रास्तेनि
गदिताः स्यानभ्रष्टाह्वयाबुधैः त्रयोदशाक्षराये।
स्युर्मंत्राःपंचदशाक्षराः विकलास्तेविधीयंतेशते
सार्धशतंत्तवा शतद्वयंद्विनवतिरेकहीनोथवापिवा
शतत्रयंवायत्संख्यंतिःस्नेहास्तेसमीरिताः चतुःशता
न्यथारभ्ययारभ्ययावद्वर्णसहस्रकं अतिहद्धः प्र
योगेषुपरित्याज्यःसदाबुधैः सहस्राणाधिकामंत्रा
दंडकाःपीडिताह्वयाः द्विसहस्राक्षरामंत्राःखंडशः
शतधाकृताः ज्ञातव्याःस्तोत्ररूपास्तेमंत्रापतेयथा
स्थिताः तथाविधाश्चवोद्धव्यामंत्रिभिःकाम्यकर्मसु
दोषानेतानविज्ञाययोमंत्रान्जपतेजडः सिद्धिर्न।
जायतेतस्यकल्पकोटिशतैरपि अथात्रलेपकग्रं
थोपिघोरपतावशाल्लिख्यते ॥ इत्यथःषट्कर्णगो

प्र॰ च॰ सा॰ ५ मंत्रस्तुल्लः स्यादधिकैर्जपात् गर्वितस्त्वविधिप्राप्तः
शत्रवो वैरिकोष्ठगाः बलाल्लब्धज्वरप्रायाहृद्धाग्र
वेदनयान्विताः निर्जिताः कर्मवाङ्गल्यादहंसाः म
5 त्ववर्जिताः एवंडीभूतास्त्वंशाज्जापात् अंगहीनास्त्व
संहृताः सानुनासिकाः। अकालविनियोगेन मू
र्छिताः स्वापमाजपात् मंत्राः पत्रेषु पठनादन्यवर्णै
स्तु कीलिताः रुद्धाविसंज्ञकाः प्राप्तदुःखा वैरिसमन्वि
ताः अप्रणीतोपदिष्टा ये क्षीणवीर्यास्तु ते मताः सदा
प्रयोगात्कुंठत्वं क्लिष्टतातिविलंबनात् रुग्नाः प्रल
यैर्वैजापात् अन्यमंत्रैः सहाविलाः उपेक्ष्यावश्यया
जापाद्वेषम्यादवमानिताः पंचविंशतिरुद्दिष्टादोषा
स्तान् शामयेद्गुरुः बंधनं योनिमुद्रायां मंत्राणां वी
र्ययोजनं उभयं बोधयन् शिष्यं संवदेद्गुरुरात्मवान्
गुरोर्लक्षणमेतावदादिमांत्यं तु वेदयेत् आदिमांत्य
विहीनास्तु वर्णाः स्युः शारदभ्रवत् तस्मादादित ए
वासौ ब्रूयात्तु नदहंकृतिं यदहंकारविज्ञानान्मत्स
मो जायते नरः अनादिक्रमसंसिद्धमातृकार्यं तयो
जनात् तादात्म्यसिद्धिं तां विद्धि सर्वमंत्रार्थविग्रहां
इत्यादि द्विजातीनां तु संस्कारं वेदोक्तं समुदाहृतं अ
न्येषामपि वर्णानां विद्यया समुपाचरेत् नियतेविद्य

यादाहोऽन्यत्सर्वं हि समाचरेत् यथाशक्तिवस्त्राल
कारादिभिः विद्यया विसृजेन्मंत्री स्वविद्ययासिद्धि।
दे[illegible]वैसाधकंसंपूज्यभोजयेत् मंत्राणांदशाकथ्यंते
संस्काराःसिद्धिदायिनः जननंजीवनंपश्चात्ताडनं।
बोधनंतथा अथाभिषेकोविमलीकरणाप्यायने
ततः तर्पणंदीपनंगुप्तिर्दशैतामंत्रसंस्क्रियाः मंत्रा
णांमातृकामध्यादुद्धारोजननंस्मृतं मातृकावर्णा
न्तंतंडुलेविलिख्यतद्वियानेनसंपूज्यतन्मध्याद।
भीष्टमंत्रवर्णपटनंमातृकामध्यादुद्धारः प्रणवांत
रितान्कृत्वामंत्रवर्णान्जपेत्सुधीः यतजीवनमि
त्याहुर्मंत्रशास्त्रविशारदाः मंत्रवर्णान्समालिख्य
ताडयेच्चंदनांभसा प्रत्येकंवायुनामंत्री ताडनं तदु।
दाहृतं विलिख्यमंत्रंतन्मंत्रीप्रसूनैःकरवीरजैः॥
तन्मंत्राक्षरसंख्यातैर्हन्यात्तद्बोधनंस्मृतं भूर्जेकुंकु
मादिनामंत्रंविलिख्यवह्निबीजेनकरवीरपुष्पैःशा।
तवारं ताडयेत् यत्तद्बोधनमित्यर्थः स्वतंत्रोक्तविधा
नेनमंत्रीमंत्राणांसंख्यया अश्वत्थपल्लवैर्मंत्रमभिषिं
चद्विशुद्धये स्वतंत्रोक्तेति मंत्रांते अमुकंमंत्रमभिषिं
चामिनमइत्यर्थः संचिंत्यमनसामंत्रंज्योतिर्मंत्रेणनि
र्दहेत् मंत्रेमलत्रयंमंत्रीविमलीकरणंत्विदं आण

प्र॰च॰ वकार्मकमायिकंमलत्रयं तारव्योमाग्निमनुयु
मा॰ गदंडीज्योतिर्मनुर्मतः तत्रव्योमेतिहकारः मनु
९ रितिचतुर्दशस्वरः दंडोनुस्वारः मूलाधारेवह्नि
6 मंडलेज्योतिर्मंत्रंतद्रूपरिसाध्यमंत्रंसंचिंत्य ज्योति
र्मंत्रतेजसादहेदिति कुशोदकेनजप्तेनप्रत्यर्णं।
प्रोक्षणंमनोः तेनमंत्रेणविधिवदेतदाप्यायनंम
तं मंत्रेणवारिणामंत्रतर्पणं तर्पणंस्मृतं तारव्यप
त्रेमंत्रंविलिख्यमंत्रांते अमुकंमंत्रंतर्पयामिनम
इतितर्पयेत् तारमायारमाद्योगोमनोर्दीपनमुच्य
ते जप्यमानस्यमंत्रस्यगोपनं त्वप्रकाशनं। सं॰
स्काराद्दशसंप्रोक्ताः सर्वमंत्रेषुगोपिताः पुनरपि
शिवगीतायामप्युक्तं सर्वान्कामानवाप्नोतिम
नुष्यः कंबलासने कृष्णाजिनेभवेन्मुक्तिर्मोक्षः।
श्रीर्व्याघ्रचर्मणि कुशासनेभवेज्ज्ञानमारोग्यंपत्र
निर्मिते शाड्वलेवोदरूभ्रवेवापिजपपूजांसमा
चरेत् पाषाणेदुःखमाप्नोतिकाष्ठेनानाविधान्
गदान् वस्त्रेश्रियमवाप्नोतिभूमौमंत्रोनसिद्ध्यति
अथगारुडकल्पोक्तप्रकारेणासननियमोलिख्य
ते धरण्यांदुःखसंभूतिर्दौर्भाग्यंदारुकासने तृणा
सनेयशोहानिः पल्लवेचित्तविभ्रमः अभिचारादि

केनीलंबन्धंवश्यादिकर्मणिवंशासनेदरिद्रः स्यात्पा
षाणे व्याधिपीडनं दर्भासने तपोवृद्धिःप्रजावृद्धिश्च
वल्कले गिरिगोष्ठपरिस्यंदनद्यारण्याश्रमाहृदाः दे
शाः उत्तमा जपस्यैतेयत्रवारोचतेमनः गृहेत्वेकगु
णंजप्यंनद्यांतुद्विगुणंभवेत् गवांगोष्ठेशतगुणमः
रण्यागारेशताधिकं सिद्धक्षेत्रेषुतीर्थेषुदेवतायाश्च
सन्निधौ सहस्रशतकोटिस्यादनंतंविष्णुसन्निधौ ।
अश्वत्थमग्निमादित्यंब्राह्मणंदेवमंदिरं नदीजला
शयंचैवपृष्ठकृत्वंजपेन्नतु इतिविशिष्ठमंत्रदेवता
प्रकाशिकायामुक्तं सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्यच
जलस्यच विप्राणांचगवांचैवसन्निधौशस्यतेजपः
एतेषु नैष्ठामसतेषु एकस्मिन्नेवासीनः स्वगुरुगणा
धिपादीन्वंदेत तत्प्रकारउच्यते स्वस्तिश्रीपरम
शिवनाथपादाद्यशेषगुरुपारंपर्यक्रमेणस्वगुरुना
थपादांबुजंयावत्तावत्प्रणौमि अथवा ब्रह्माद्यशेष
गुरुपारंपर्यक्रमेणस्वगुरुनाथपादांबुजंयावत्ताव
त्प्रणौमि श्रीगुरुभ्योनमः इतिमूर्द्धिसंवंद्यगंगुरुभ्यो
नमइति दक्षिणांसे गंगणपतयेनमइति वामांसे
दुंदुर्गायैनम इतिवामोरुदेशे क्षंक्षेत्रपालायनम
इति दक्षिणोरुदेशे संसरस्वत्यैनमइतिवक्त्रे पंपरा

प्र·वे·
सा·
७

त्मनेनमश्ति हृदये संवेश्य। पुनर्वामहस्ततलेन
दक्षिणहस्ते कूर्परदेशादारभ्यतलांतं सुदर्शना।
स्त्रमंत्रेणवैष्णवदेवताविषयेशैवविषयेतुपाशु
पतास्त्रेण इतरविषयेतुब्रह्मास्त्रेणविन्यसेत् ॥
सुदर्शनास्त्रमंत्रस्तु सहस्रार हुं फडिति पाशुप
तास्त्रमंत्रस्तु वामदेवऋषिः पंक्तिश्छंदः पशुपति
र्देवता: श्लीं पशु हुं फडिति ब्रह्मास्त्रमंत्रस्तुज्ञात
पः सत्यात्मने ब्रह्मास्त्राय फडिति कूर्परंनाममणि
बंधादूर्ध्वदेशः मणिबंधोनामहस्ततलस्यमूल
देशः पुनर्वामेपीतरेणहस्ततलेनतथैवकृत्वापु।
नर्वामहस्ततलेनदक्षिणस्यापरदेशेकूर्परतआर
भ्याग्रं तथैवेतरस्यापीतरेणन्यस्यपुनरपिततए
वारभ्य इतरेतरेण हस्ततलेन इतरेतरस्यहस्तस्यस
कलदेशेपि तेनैवास्त्रमंत्रेणन्यस्यपुनर्हस्ततल।
योरन्योरन्योन्यसंहति जघ्वनित्रयेणतालत्रयात्मके
नतेनैवास्त्रमंत्रेण उपर्युपरिक्रमेणत्रिवारंकृत्वापु
नस्तेनैवास्त्रमंत्रेणपूर्वादिशमारभ्याधस्तादंतंक्रमे
णादशदिग्बंधनं अंगुष्ठतर्जन्यग्रोदितध्वनिपूर्वकं।
कुर्यात् तेनैवमंत्रेणतथैवसंपुटकर्यांगस्यापरित
स्त्राग्निप्राकारंध्यानेनकुर्यात् तदुक्तंचसमस्तसंप्रदाय

सर्वस्वाभिधानाख्ये प्रपंचसारविवरणे याभिर्दशभि
र्मंत्रैर्दशस्वदिक्षु तर्जन्यंगुष्ठछोटिकाभिरात्मनो रक्षां
कुर्यादिति तत्र दिक्पालपूजाविषये प्रागाद्यूर्ध्वांतं दि
क्रमः दिग्बंधने तु प्रागाद्यधस्तादंतमिति विशेषः त
दुक्तं चास्मिन्नेव शास्त्रे स्वदर्शनपटले ऐंद्रीं दिशं समा
रभ्य दिशां त्वधस्तादंतं प्रोक्ता चक्रेण वै भ्रामितमस्तथो
ऽस्त्राचक्राय शीर्षं च दिशां प्रबंध इति । एतत्सर्वं क्रमदी
पिकायामप्युक्तं च स्नातो निर्मलसूक्ष्मशुद्धवसनो धौतां
घ्रिपाणिप्राननः स्वाचांतः सुपवित्रमुद्रितकरः श्वेतोर्ध्व
पुंड्रोज्ज्वलः प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं
स्वस्तिकं वासीनः स्वगुरून् गणाधिपमथो वंदेत ब
द्धांजलिः ततोऽस्त्रमंत्रेण विशोध्य पाणी त्रितालदि।
ग्बंधकृतात्मशालान् विधाय भूतात्मकमेतदंगं वि
शोधयेत्कुड्मतिः क्रमेणेति अथात्र स्वदर्शनेन
दिग्बंधने पक्षविशेष उच्यते ॐ नमः सुदर्शनायास्त्राय
फडित्यनेन मंत्रेण वा दशदिग्बंधनं कुर्यात् एवम।
पि संप्रदायोऽस्ति तदुक्तं च क्रमदीपिकायां प्रणवहृ
दोऽवसाने सचतुर्थीसुदर्शनं चास्त्रकं च उक्त्वा फडंत
ममुनाकलयेत्समंतुनास्त्रमुद्यद्दशाहरित इति सु
दर्शनेन चेदेवं वा दिग्बंधनं कृत्वा पुनर्भूतशुद्धिं कु।

प्र॰ वे॰
मा॰
१८
४

कुर्यात् तत्प्रकारस्तु क्रमदीपिकोक्तप्रकारेण कथ्य
ते इडावक्त्रे धूम्रं सततगतिबीजं सलवकं स्मरेत् पूर्वं स
श्रीसकलभुवनोच्छोषणकरं स्वकं देहं तेन प्रततव
पुषापूर्य सकलं विशोष्य व्याप्तं चेत्पवनमथ मार्गेण
खमणेः तेनैव मार्गेण विलीनमारुतं बीजं विचिंत्या
रुणामाप्युष्णणैः आपूर्य देहं परिदह्य वामतोऽसं
चेत्समीरं सह भस्मना बहिः दपवमतीवशुभ्रममृतं
शुपथेनैविधुं नयनेललाटचंद्रममृतः सकलाण
मयी दपरंजपान्निपात्य रचयेन्नतया सकलं वपुरस्ट
तोधहृष्टिमथवक्त्रकरायमिदं अस्यार्थः प्रथमं इडाव
क्त्रे वामनासिकाश्रितइडानाडीवक्त्रे तत्र वायुबीजं सलवकं
लवकमिति विंदुः तेन युक्तं पुनस्तद्बीजं धूम्रवर्णं च धू
म्रमिति नीललोहितमिश्रवर्णं तादृशं वायुबीजाख्यं
यकारं सकलभुवनोच्छोषणकरं स्मरेत् एवं स्मृत्वा
प्रततवपुषा व्याप्तवपुषा तेन वायुना स्वकं देहं वामना
सिकाश्वासमार्गेणैवापूर्य सकलं दैहिकदुष्टं विशो
षितं स्मृत्वा पुनः खमणेरादित्यस्य मार्गेण पिंगलाना
ड्डिकामार्गेण दक्षिणनासिकाश्वासमार्गेणेत्यर्थः ते
न मार्गेण तं पूर्वपूरितं वायुं व्याप्तं चेत् रेचयेदित्यर्थः
पुनरपि तेनैव मार्गेण खमणेर्मार्गेण दक्षिणनासि

काश्वासमार्गेणेत्यर्थः तेनमार्गेणपूर्वविसृष्टमा
रुतमेवपश्चाद्विलीनमारुतंनिवर्तयित्वातत्रैवप्र
विष्टमारुतंकृत्वापुनरायुश्युस्त्रणेनबीजंसवि
न्दुकरेफमित्यर्थः तद्वीजमरुणमव्यक्तरागस्वरूप।
मेतादृशमायुश्युस्त्रणेबीजंतुविलीनमारुतमिति
क्रियाविशिष्टंदेहंसर्वंपरिदग्धंसंभाव्यवामनासि
काश्वासमार्गेणवायुंतेनदग्धभस्ममासह्व्याप्तंचेत्
पुनःटपरमिति टपरंविन्दुमितिसमानाधिकरणे
द्वितीये टपरष्टकारः तंविन्दुंसोमात्मकंशुभ्रवर्णं
चध्यात्वाश्रमृतांशुपथ्येन इडानाडीमार्गेणवामना
सिकाश्वासमार्गेणेत्यर्थः तेनमार्गेणमूलाधारंनी
त्वासुषुम्नानाडीद्वारेणललाटोपलक्षितद्वादशान्त।
स्थितमिन्दुमंडलंप्रापय्यतयोरुभयोःसंबंधाच्चन्द्र
मंडलचालना ततोनिःसृतामृतामृतधारयात।
द्भस्मप्लाव्यतथैवजीवमापाद्यपुनरकारादिवर्णा।
त्मकयानयामातृकयावर्णादिकमुत्पादयामीत्यनु।
स्मरन् वमित्यमृतबीजंसप्रणवंचत्रिंशद्वारंकुंभके
नसंपाद्यदेहकठिनाख्यंलंबीजंमूर्ध्नि विन्यसेत्पुन
र्मातृकावर्णन्यासानन्तरंतत्रादिनाऽस्मिन्नेवमातृका
पटलेऽपरिवक्ष्यमाणक्रमेणन्यसेत् एवमिडावक्रे

प्र. च.
सा.
९

9

त्यादिनोक्तो भूतशुद्धिंप्रकारः केवलमात्रकान्या
सेनैव वा भूतशुद्धिं कुर्यात् अथवा प्रकारान्तरेणापि
स्वस्वागमोक्तप्रकारेण भूतशुद्धिं वक्ष्ये स्वदेहं पृथि
व्यादिभूतबीजं ब्रह्मबिलभ्यामुद्भिन्नांकुरं रागद्वेष
धर्माधर्ममोहमूलं विद्याधिपतिपरिपालितं कला
दितत्त्वसारं तन्मात्रेन्द्रियशाखोपशाखं विषयालोच
नपल्लवं भावप्रपंचकुसुमं बुद्ध्यानिश्चयव्यवसायसं।
कल्पफलं सुखदुःखभोगोपभोग्यं भोग्यभोक्तृत्वरसमू
र्ध्वमूलमधःशाखं वटतरुरूपं संचिन्त्य प्रथमपूरका
र्द्धेन निवृत्तिकलाबीजोच्चारपंचकेन पत्रशाखाफल
रहितं स्तब्धं विभाव्य पूरकापरार्द्धेन प्रतिष्ठाकला
बीजस्य चतुष्कोच्चारणेन दग्धपत्रफलशाखोपेतं वि
चिन्त्य कुंभकेन प्रथमापरार्द्धाभ्यां विद्याकलाबीजो
च्चारत्रयेण दग्धं समूलं विभाव्य रेचकपूर्वार्द्धेन शां
न्तिकलाबीजोच्चारद्वयेन भस्मीभूतं दग्धादिक्षुप्र
लीनं विभाव्य रेचकापरार्द्धेन शांत्यतीतकलाबीजै
कोच्चारणेन शुद्धस्फटिकरूपं संचिंतयेत् ततो दग्ध
रूपं सर्वशून्यमिति विभाव्य वौषडंतमूलेन शिवां
तस्याधोमुखपद्मस्रवदमृतधाराभिः सकलनाडी
मार्गप्रविष्टाभिः सबाह्याभ्यंतरं सर्वशरीरमाप्ला

व्यष्टयेनालपत्रकर्णिकारूपं पद्ममकारादिमा-
त्रात्रयघटितेन प्रणवेन शुद्धविद्यात्मकमासनं विन्य-
स्य तत्कर्णिकायां पूर्यष्टकं चतुष्कलेन प्रणवेनाव
तीर्णं भावयित्वा तस्मिन् द्वादशान्तस्य वीजरूपं शिव
मयमात्मानं पंचकलेन प्रणवेन पूरकेण स्वस्थ्या समा
नीय ज्योतीरूपं संस्थाप्य वौषडन्तशक्तिमंत्रोच्चारेण
न्तव्यशक्तिपरिस्रुतवहलामृतप्रवाहेणाभिषिंचेत्
तत्र ह्रामिति निवृत्तिकलावीजं ह्रीमिति प्रतिष्ठाक
लावीजं ह्रूं ह्रैं ह्रौमिति विद्याशान्तिशान्त्यतीतकला
वीजेति क्रमेण एवं हंसगमोक्तप्रकारभूतशुद्धिः
अनेन प्रकारेण वा पूर्वोक्तक्रमदीपिकोक्तप्रकारेण वा
भूतशुद्धिं कृत्वा पुनर्हंकारत्रयमुच्चार्य सुषुम्नानाडी
मार्गनिरोधपूर्वकपर्वत्रयभंजनं कृत्वा हंसमुच्चार्य
मूलाधारस्थजीवं सुषुम्नया द्वादशान्तं नयन् पुनः
सोहमित्युच्चार्य द्वादशान्ते सहस्रदलकमलमध्यस्थ
सहस्रादित्यसंकाशं परमात्मानं स्वात्मनाचैको-
कृत्य पुनः प्राणायामं कुर्यात् तत्प्रकार उच्यते अकारं
सविंदुकं द्वादशवारमावर्तयन् दक्षिणनासिकया वि
रेचयेत् उकारं सविंदुकं षोडशवारमावर्तयन् वाम
नासिकया आपूर्य मकारपूर्वकं तन्मूलमंत्रं द्वाद

प्र॰ च॰
मा॰
१०

शवारमावर्तयन् कुंभकंकुर्यात् एवंप्राणायामत्र
यंकुर्यात् तदुक्तंचसम्मेलनगोपालन्यासविधाने
अमितिद्वादशवारं दक्षिणनासिकयाविरेचयेद्
मिति षोडशवारंवामनासिकयापूरयित्वामकार
पूर्वकविधासहितमंत्रंद्वादशवारमावर्तयन् कुंभ
कंकुर्यात् अथवायंयंमंत्रंजपितुमिच्छति तेनमंत्रे
णप्राणायामं पंचचतुर्विंशदादितत्संख्ययावाकेव
लकुंभकरूपेणवा अथषोडश द्वात्रिंशदादिसंख्य
यावाषोडशद्वात्रिंशच्चतुःषष्ट्यादिसंख्ययावारेचक
पूरककुंभकरूपेणकुर्यात् अथवाहरिविषयमं
त्रजपेषुसर्वत्रमूलमंत्रेणैवप्राणायामः इतरविष
येषुतत्तद्वियानोक्तेनप्रकारेणवाप्रणवेनवाकुर्या
त् एवंसर्वत्रसर्वमंत्रजपस्यपुरतस्तत्परतश्चत्रिवारं
कुर्यात् एवंदिनशोयःषोडशसंख्यंकरोतिसतुसम
स्तपापात्परिपूयते अथवा ऋष्यमंत्रेषुसर्वेषुका
मवीजेनप्राणायामंकुर्यात् तत्रचतःषष्टिवारंकु
र्यात् गोपालकदशाक्षरीमंत्रेणचेदष्टाविंशतिवा
रंकुर्यात् गोपालकाष्टादशाक्षरीमंत्रेणचेद्वादशा।
वारंकुर्यात् इतरमंत्रेष्वेकोनर्ध्वरूपंकुर्यात् तदु
क्तंचक्रमदीपिकायां पवनसंयमनंत्वमुनाचरेत्।

10

मिह जन्तुमसौमन्तुमिच्छति अथ वाखिलेष्टहरि
मंत्रजपविधिश्च मूलमंत्रतः सयमनं विमलधीः
मरुतो विधिनाभ्यसंश्चरन्तत्त्वसंख्ययाप्रतोज
पमस्यपरतो विहितमथ्यतस्त्रिनपंडुधेः षोडशाथ
ह्याचरेद्दिनशः परिश्रूयते सा खल्वसुमासतोंऽहसः अ
थवं भाजन्म मनुनाद्य संयमं सकलेष्टकृत्समन्त
जापकर्मणे सहितैकसप्तकृतिवारमभ्यसेत्तन्त
यात्म मल्लकृतिनापहारिणा अष्टाविंशतिसंख्यमि
ष्टफलदं मंत्रं दशार्णं जपतापच्छेत्सवमंत्रसंयत
मतिस्त्वष्टादशार्णैर्न चेत् अभ्यस्यन्तरविवारम
न्यमन्त्रभिर्वर्णान्तरूपं जपन्त् कुर्यादेचकपूर्वकं
मुनिश्रेणं प्राणप्रयोगं बुधः रेचयेन्मारुतं दक्षया
दक्षिणं पूरयेद्वामया मध्यनाड्या पुनः धारये
दीरितं रेचकादित्रयं स्यात्कलान्दतविद्यात्ममात्र
त्मकं इति कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं
प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना एवं प्राणा
यामं कृत्वानन्त ज्ञाप्यमंत्रं प्रतिलोमे नोच्चार्य्यत्वा
त्मानं तेजोरूपं ध्यात्वा ततेजः करतलेदक्षिणनासि
काग्रास मार्गेण निपात्य करन्यासं कुर्यात् यत्रयत्रक
रन्यासमंत्रः प्रणवान्तःकृत्वा सर्वत्र ततस्साध्यमंत्रस्य

षडंगैः पंचांगैर्वा कुर्यात् तदुक्तं चास्मिन्नेव प्रपंच
सारे अंगुलीषु क्रमादंगैरंगुष्ठादिषु विन्यसेत् कनि
ष्ठांतास्तु तदा तु तलयोः करयोः सुधीरिति अथ क
रन्यासप्रकार उच्यते उभाभ्यां कराभ्यां तत्तदंगुष्ठाद्यं
गुलीषु क्रमेणांगुलीमूलमारभ्याग्रं मंत्रपूर्वकमं
गुष्ठाभ्यां नमः इत्यादि न्यसेत् तत्र तर्जनीभ्यामंगुष्ठ
योरितरास्त्वंगुष्ठाभ्यां न्यसेत् तत्र पंचांगपक्षे अंगु
लीष्वेव विन्यसेत् षडंगपक्षे षष्ठो न्यासस्त्वावहा
मतलेन दक्षिणहस्ततले दक्षिणहस्ततलेन वाम
हस्ततले न्यसेत् एवं करष्टष्टयोश्च तदुक्तं च सत्सं
प्रदाय सर्वस्वाभिधाने प्रपंचसारविवरणे उभयोः
करयोरंगुष्ठयोर्मूलाद्याग्रं तर्जनीभ्यां तर्जन्यादि
कनिष्ठिकांतमंगुष्ठाभ्यां च पंचाभिरंगमंत्रैः परामृ
श्य षष्ठं तलयोश्च वामे दक्षिणेन दक्षिणे वामेन च
विन्यसेदिति एवं कृत्वा पुनर्लिपिन्यासमप्यविमा
तृकाविधानेन वक्ष्यमाणक्रमेण कृत्वा जपस्या यथाश
क्ति तदुपसंहृत्य पुनः साध्यमंत्रस्य ऋष्यादिपूर्वकं
जपं वा पूजां वा समारभेत् अयमेव सर्वत्र मंत्राणां
जपारंभे च न्यायः अथ मातृकामंत्रस्य ब्रह्मा ऋषि
र्गायत्री छंदः मातृका सरस्वती देवता तत्र ऋष्या

देः स्थानान्यस्मिन्नेव शास्त्रे पंचमं पटलादावुक्ता
नि ऋषिर्गुरुत्वाच्छिरस्येव यथार्थः छंदोऽक्षरत्वाद्रस
नायां तत्स्यात् धियावगंतव्यतयास देवस्तु हृदि प्रतिष्ठा
मन्त्रदेवतायाश्च इति एतेषामर्थस्तत्तंत्रे चोक्तः
ऋषिवर्णादिको धातुः स्यो गत्यां प्रापणेऽपि च तस्यां
यद्यस्त्वरूपं स ऋषिः स्याद्गुरु वाचकः इष्टादाना
र्थको धातुस्त्वच्छादायश्च्छदादिकः तयोरिष्टांददा
तीति छंदो मंत्रार्णवाचकः आत्मनो देवताभावप्रदा
नाद्देवतेति च पदं समस्तमंत्रेषु विद्वद्भिः समुदीरि
तमिति एवमृष्यादीन् न्यस्त्वा ततः षडंगान्यवश्यक
कर्तव्यानि कुर्यात् सेयाद्दक्षिणामूर्तिकल्पे तु भक्त
श्चेदवश्यकर्तव्यता नाहित्यमुक्तं च अंगन्यासं वि
नावापि शिवभक्तस्य सिध्यति अंगमंत्रैर्विनावापि
सिद्धसाध्यादिभिर्विना जपेन मंत्रः सर्वेषां सर्वसिद्धि
प्रदो भवेदिति अथ षडंगन्यासस्थानानि च तत्प्रका
रश्चोच्यते हृदयशिरश्शिखाश्च कवचास्त्रनेत्रेषु
स्वचतुर्थीषु नमः स्वाहा च वषट् हुं वौषट् फट् पदैः
षडंगविधिः पंचैव यस्य मंत्रस्य भवंत्यंगानि मंत्रि
णः सर्वेष्वपि च मंत्रेषु नेत्रलोपो विधीयते इति ॥
अथ मातृकामंत्रस्य षडंगविधिः अकाखगचट•

प्र·च·
सा·
१२

श्रीहृदयायनमः इचछजझञईशिरः उटठड
ढणऊशिखा पतथदधनएकवचं ऐंपफबभम
ऐंनेत्रं ओयरलवशषसहलक्षऔः अस्त्रं मातृका
वर्णैरंगविधौसर्वत्रैवमेवस्वराक्षराणांविंदुयुक्तं
चहलां तद्रहितंचस्वराणांमध्ये अकारादिवर्णाव
तद्वयरहितंचस्वरान्तरंहंठष्टरि लकादिवर्गोव
कर्तव्यं तद्युक्तंच आद्यन्तस्वरषट्क लक्ष्मपदयोरंतः
स्थितैःकादिभिर्वर्गैर्यान्तगतैःक्रमेणकथितान्य
स्याः षडंगानिचैतत् इति तथोगन्यासमुद्राप्रकारः
क्रमदीपिकोक्तप्रकारेणोच्यते अनंगुष्ठाकरजवोह
लग्नाखाभवेन्मुद्राहृदयेशीर्षकेच अधोमुखांगु
ष्ठावलमुष्टिः शिखायांकरहंद्वांगुलयोर्वर्मणि
स्युः नाराचमुष्ट्युंहतवाहुकंप्रमकांगुष्ठतर्जन्यु।
दितोध्वनिस्तु विष्टरविषतः कथितोस्त्रमुद्रायत्रा
दिशानितर्जनीमध्यमेत्र यत्रादिशीत्यनेनयत्र
शाद्वेनपंचांगपदेनेत्रलोपः प्रागुक्तः स्थितः
तत्रनाराचमुष्टि लक्षणमुच्यते हस्ततलद्वयमा।
न्योन्यंसंमुखीकृत्यतयोर्मध्यमानामिकाकनिष्ठि
कांगुलीमुष्टीकृत्यतर्जनीद्वयंतदग्रेज्ञं कृत्वान्यो
न्याग्रेणसंस्पृश्यांगुष्ठद्वयंतनत्थेवअग्रेकृत्वान्योन्यं

नेत्रत्रिष्वनाभ्यसंगुष्ठतर्ज्जनीद्वंद्वाभ्यामुदितो
ध्वनितः स्वपरितो विषक्तः अस्त्रमुद्रेत्यर्थः तत्रा॰
स्त्रमुद्रानंतरं नेत्रमुद्रोक्त्या वैलवदेवताविषये
सर्वत्रअस्त्रन्यासानंतरं नेत्रन्यासः इति केषांचि
न्मतः सूचितः मंत्रदेवताप्रकाशिकायामप्यं
गविधिरुक्तः त्रिशोकेंदशाकेत्रिहिसंख्याकांगु
लिभिः क्रमात् अस्यार्थः अंगुष्ठतर्ज्जनीमध्या
मांगुलीकेनांगुलित्रयेण हृदयं अंगुष्ठतर्ज्जनीभ्यां
शिरः अंगुष्ठेन शिखा उभयकरदशांगुलिभिः क
वचं तर्ज्जनीमध्यमाऽनामिकात्रितयेन नेत्रं उभ
यकरांगुष्ठतर्ज्जनीभ्यामस्त्रमिति अंगानामर्थ
स्तु हृदयं बुद्धिगम्यत्वात्सर्व्वेण मनःस्थानमतः परं क्रि
यते हृदयेमानोबुद्धिगम्यानमस्कृतिः तुंगार्थः
शिवसेचेति विषयाद्भरणो हितः शिरो मंत्रेणचो॰
तुंगा विषयाप्रतिलक्षणा शिखा तेजःसमुद्दिष्टा
व्याप्ति रुंगमुच्यते तत्तेजो स्पतनुः प्रोक्ता शिखायां मं
त्रेणमंत्रिभिः कवचग्रहणाभ्यासः मादातोः कवचसं॰
भवः ज्ञातेजस्तेजसादेहो गृह्यते कवचं ततः अस्त्र
शासादिकोथात् तंकोपचलनार्थकौ येनातिष्ठे
समादिष्ट्यत्वालयेत्फड्पराग्निना नेत्रं दृष्टिः स

न्तुद्दिश्यावौषट्दर्शनमुच्यते दर्शनंहविष
येणस्यात्तेजोनेत्रवाचकमिति एवमंगन्या
संकृत्वापुनर्बीजशक्त्यादीन्स्मरेत् यत्रयत्र
बीजशक्तीष्टयागान्तुक्ते तत्रसर्वत्रप्रणवोबी
जं भुवनेश्वरीशक्तिरित्याचार्याऽभिप्रायप्र
तिवर्णायंति तत्रुक्तंच प्रपंचसारटीकाकारे
ण अनुक्तबीजशक्तिविशेषाणांमंत्राणांप्र
णवोबीजंभूतिः शक्तिरिति विवरणटकारे
स्तुतत्रतत्रोक्तानिच अत्रअमातृकायां ह्रमि
तिबीजं सश्रुतिशक्तिः बीजशक्तिकीलकेस्त
स्तनयोर्हृदयोर्हृदि विन्यसेत् केवलंमनसास्म
रेद्वा अथवाइष्टवारंजपेद्वा तत्रगोपालविषये
नक्वचित् किंचिदधिकानिसंति क्लींबीजं।
स्वाहाशक्तिरितिस्तनयोः जं कीलकं वेबीजं
एतत्त्रयंहृदये कृष्णः प्रकृतिरितिनाभौ दु
र्गाधिष्ठात्रीदेवता विष्णुः अभिमानिनीदेव
ता एतत्त्रयंहृदिन्यसेत् सर्वमंत्रस्यापिप्रकृति
देवता अधिष्ठात्रीदेवता अभिमानिनीदेवता
चेति देवतात्रैविध्यमस्ति यथागायत्रीमंत्रस्य
सूर्यस्यनारायणस्यसावित्र्याश्च एवंसर्वत्रानुक्तस्य

लेगुरुमुखाद्देवताद्वैधं मंत्रदेवताप्रकाशिका-
यामुक्तं वीजंशक्तिंच मूलाधारेन्यसेत् सकल-
मंत्रेषुब्रह्मवीजंमायाशक्तिः जीवोवीजंबुद्धिःश-
क्तिः उदानोवीजंसुषुम्नानाडीसरस्वतीशक्तिरि-
ति मूलाधारेन्यसेत् तत्रब्रह्ममायाशब्दाभ्यांप्र-
णवहृल्लेखार्थभूतेपरब्रह्ममूलप्रकृती उच्येते
जीवबुद्धिशब्दाभ्यांसर्वकारणभूतब्रह्ममाययो-
र्ज्ञानभागावुच्येते उदानसुषुम्नानाडीशब्दाभ्यां
ब्रह्ममाययोःप्रवर्तकभागावुच्येते एवंसत्यशव-
लितयोब्रह्ममाययोःसर्वप्रपंचकारणत्वं ॥ प्र-
णवहृल्लेखयोःसमस्तमंत्रवीजशक्तिकारण-
त्वं चोक्तंभवति तस्मात्समस्तमंत्रानुस्यूतशब्द-
ब्रह्माख्यमातृकामंत्रावर्णाहि प्रणवहृल्लेखावा-
च्यमायाशवलितब्रह्मस्वरूपप्रत्यगात्मभूता-
ऽखंडस्वच्चित्प्रकाशात् समस्तांगसहितसर्वदे-
वतामंत्रमूर्तयः साधकस्यभाग्यवशात् प्रज्वलि-
ताग्नेर्विस्फुलिंगाइवप्रादुर्भूताइतिभावयेत्
अनंतरं तत्पाविद्याभीष्टदेवतामयंतेजःस्वश-
रीरेऽन्तर्वहिश्चव्याप्नोतीतिचिंतयेत् पंचाशद्व-
र्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदे-

प्र॰च॰ देहं भास्वत्कपर्द्दीकलितशशिकलामिंदुकुं
सा॰ दावदातां रत्नस्वकुंभचिंतालिखितवरकरां
१४ त्रीक्षणां पद्मसंस्थामच्छाकल्पामतुच्छस्तनज
घनभरां भारतीं तां नमामि तत्राक्षस्रगित्यक्षमा
ला कुंभः पूर्णकुंभः चिंतेति ज्ञानमुद्रा लिखि
तं पुस्तकं तत्र दक्षिणांगुष्ठतर्ज्जन्योरन्योन्याग्र
संस्पर्शेन परामृष्टस्वप्रदर्शनं ज्ञानमुद्रेतिकी
र्त्यते पुनरेवं ध्यात्वा त्रिंशत्पटलेप्येवकविधा
नेवक्ष्यमाणप्रकारेण प्राणप्रतिष्ठां कृत्वा मान
सपूजां पंचोपचारैः कुर्यात् तत्प्रकार उच्यते ॥
प्रथममुभयकरांगुष्ठेण उभयकनिष्ठयो
र्मध्यमपर्वणोः स्पर्शनपूर्वं । ओं गंधं कल्पयामी
त्युक्त्वा गंधोपचारं समर्पयेत् पुनस्तथैव तर्ज्ज
न्यग्रहृदयेनांगुष्ठहृदयमध्यदेशसंस्पर्शनपूर्वकं
ओं पुष्पं कल्पयामीति पुष्पमुद्रया पुष्पोपचारं
समर्पयेत् पुनरितरास्तिसृष्वंगुलीषु त
र्ज्जन्यादिषु अंगुष्ठाग्रेण मध्यमपर्वदेशसंस्प
र्शनपूर्वकमेव ओं धूपदीपनैवेद्यमुद्राः क्रमेण
तत्तन्नाम्ना पूर्ववदेव समर्पयेत् एवमेव सर्व
त्र मानसपूजाकारः तत्क्रमदीपिकायांस्तु

चितंच ततो निवेद्यमुद्रिकां प्रधानयाकरहृदये
स्पृशन्नामिकां निजं मन्त्रं जपन् प्रदर्शयेदिति
प्रधानयेत्यंगुष्ठेन तत्र केवलं निवेद्यमुद्रामा
त्रं प्रदर्शितं अयमेवन्यायइतरमुद्रिकाणामपि
द्रष्टव्यः अथवा कल्पांतरोक्तप्रकारेण गंधाद्यु
पचारमंत्रः लं पृथिव्यात्मने नारायणाय समर्पितं गं
धं कल्पयामि हं आकाशात्मने वासुदेवाय पु
ष्पं कल्पयामि यं वाय्वात्मने संकर्षणाय
धूपं कल्पयामि रं अग्न्यात्मने प्रद्युम्नाय दीपं क
ल्पयामि वं अमृतात्मने अनिरुद्धाय आनंदं नैवेद्यं
कल्पयामि एवं एभिर्वा मंत्रैः पूर्वोक्तमुद्राप्रका
रेण मानसपूजां कुर्यात् एवं स्वहृदये देवतां ध्या
त्वा तत्र मानसपूजां कृत्वा मातृकासरस्वतीमं
त्रं पूर्वसेवाक्षरसमं लक्षसंख्यं जपेत् न्यसेत्तु
तत्संख्यं पुरश्चरणार्थं अकाराद्याः क्षकारांता व
र्णा मातृका सरस्वतीमंत्रः तत्र पूर्वसेवेति सर्वेषां मं
त्राणां पुरश्चर्यायाः प्रागेव तदधिकारसिद्ध्यर्थं पञ्चा
शत्संख्यं जपनमित्यस्ति नियमः तावतस्तद्द्विधा
नोक्तसंख्यया पूर्वं जप्त्वा पश्चाद्यथाविधि पुरश्च
र्यां कुर्यादित्यर्थः तत्र च पिच्छिलिकाचास्मिन्नेव प्र

प्र॰ च॰ सा॰ १५

पंचसारे वक्ष्यमाणत्वादिह विधाने द्वात्रिंशत्सह
स्रैरधिकृतिप्रतैर्भवेत्र पुरश्चरणं तावद्भिर्लक्षावल
क्षैः सिद्धिः समीहितास्यमनोरिति क्रमदीपिका।
यामप्येवमेवोक्तमष्टादशाक्षरीविधाने दशाक्ष
री विधाने च तेनानुज्ञातः पूर्वसेवां द्वितीये मासे
ष्टादशमारभेतामल्लाद्यो प्रजपेदयुतचतु
ष्कं दशाक्षरं मनुवरं पृथक्कृक्रमशः अष्टादशा
क्षरं वेदयुतद्वितयमितं दीक्षितासंख्येति पुन
रपि तंत्रे चोक्तं एकं वैषामशाको गदितमिह
मया पूर्वसेवाविधानं निर्दिष्टं ने सिन्नुनस्मषुवा
मशाक्ताविति पतेषां पदम्नाम सिमर्षेऽन्वयो
नास्ति पूर्वसेवान्वयः तत्तु पूर्वसेवासंख्याय
त्रेनोक्ता तत्र सर्वत्र सहस्रसंख्यया कुर्यादित्यतिसं
हायः तदुक्तं च मेधादक्षिणामूर्तिकल्पे सं
ख्यानुक्ते शतं तथा समिधोऽनुक्तविषये पा।
ल्पाशाः परिकीर्तिता इति तत्र शिवभक्तस्य पूर्व
सेवां प्रत्यानियमो नास्ति तदुक्तं चिदंबरकल्पे
पूर्वसेवां विनाप्यपि शिवभक्तस्य सिध्यतीति इति
श्रुत्याऽस्यमात्रकामं त्रुस्याद्वन्यासस्यानास्त्र
यं ते कामनहननदादिमफतिनोगंडोपृदंत।

मूर्ध्नांसे दोःपत्संध्यग्रेषु च पार्श्वहृद्यपृष्ठनाभिज
ठरेषु हृदोर्मूलापरगलकक्षेषु हृदादिपादयुगे
ष्वर्णान्तयोर्व्यापकसंज्ञां न्यसेद्यथास्थानं क्रम
शः तत्र यादयो व्यापकाक्षराणि तानि तु हृदयादा
रभ्यैव तत्तदङ्गस्थानपर्यन्तं व्यापकरूपेणैव न्यसेत्
तदुक्तं च क्रमदीपिकायां हृदयपूर्वमनेन यथाऽ
न्वहं न्यसेत् सकलेवरमिष्टये इति तत्र दोर्मूला
परगलकक्षेषु इत्यत्र क्रमदीपिकामते कक्षेक
कुदिदोर्मूलइति दक्षिणकक्षे वामे तु दोर्मूलइ
त्यर्थः पदविशेषः एवं सृष्टिन्यासः एतद्विपरी
तस्थानक्रमेण मन्त्रप्रतिलोमेन च संहारन्यासः
पुनर्बीजमूलादिस्थानमारभ्य हल्भिरनुलोमन्
यासरीत्या न्यस्त्वा पश्चात् स्वरैः शीर्षादिस्थाने
षु न्यसेत् एवं स्थितिन्यासः तत्र सृष्टिन्यासे गृ
हमात्रकया न्यसेत् संहारे तु सविन्दुकमात्रक
या स्थितिन्यासे तु विसर्जनीयान्तैर्वर्णैर्न्यसेदिति
विशेषः अथ गुरुक्रमुखात्सकलमन्त्रोपदेशवि।
धिं वक्ष्ये तत्र प्रथमं गुरूपदेशार्थं मासनियमं चि
दंबरकल्पोक्तप्रकारेण वक्ष्ये तत्र मित्रादिशोध
नं क्वचित्क्वचिन्मन्त्रप्रभाववशान्नास्ति तथा।

प्र·व·
ता·
१९

पिमासस्योधनमवश्यंकर्तव्यं तदुक्तंचिदंवर
कल्पे पंचाहस्यमंत्रस्यनैवमित्रादिशोधनं
तथाप्यवश्यकर्तव्यंमासशोधनमादरादिति
अतोमासतिथमउच्यते अश्विस्त्रिभिर्भूमिसंपत्ति
र्मरणंबंधुनाशनं स्वभ्रमाभिःस्याननाशः सं।
पत्तीरत्नसंपदः मौन प्राभिर्ज्ञाननाशश्चमोचा
योंवशीकृतिः एवंचैत्रादिमासानांफलान्या।
हुर्मनीषिणः सोमवारेशुक्रवारेत्वसंपत्क्षेम
साथके मैत्रेपरममैत्रेवासंत्रदीतासमावरेदि
ति एवमुक्तेशुभेशुमासेह्युपदेशाकुर्यात्
मेषेप्रतापवानभूपात् वृषभेत्तुसुखीभवेत्
मिथुनेविकहलः स्यात्कर्कटेदुःखवान्भवे
त् सिंहेसर्वसमृद्धिःस्यात्कन्यायांतत्त्वगाल
भेत् तुलायांलाभवानभूपात् वृश्चिकेविक
हंभवेत् धनुर्मासेतुसौभाग्यंमकरेधनवान्भ
वेत् कुंभेस्यादापुष्टोहि मीनेस्याद्राजवल्लभः
इत्यादिमासानालोच्यचरेन्मंत्रंविचक्षणः
अथोपदेशार्थंतिथिवारनक्षत्रादिनियमोलि
ख्यते अश्विनीरोहिणीचार्द्रातथापुष्यतिरा।
त्रये हस्तचित्रास्वातिमैत्रंविशाखाचधनिष्ठ

16

का पुनर्वसू रेवती च प्रशस्ता मंत्रसंग्रहे मैत्रमि ।
त्यनुराधा पौर्णिमा पंचमी चैव द्वितीया सप्तमी त ।
था त्रयोदशी च दशमी प्रशस्ता मंत्रसंग्रहे त्वती
याविहिता नित्यं षष्ठी सर्वत्र गर्हिता रवौ गुरौ बुधे
शुक्रे कर्तव्यं परमेश्वरि मंत्राद्यारंभणं मेषे धन ।
धान्यप्रदं भवेत् वृषे मरणमाप्नोति मिथुने यत्न
नाशनं कर्कटे सर्वसिद्धिः स्यात् सिंहे मेधाविनाश
नं कन्या लक्ष्मीप्रदा नित्यं तुलायां सर्वसिद्धयः
वृश्चिके सर्वसिद्धिः स्यात् धनुर्ज्ञानविनाशनं
मकरः शुभदः प्रोक्तः कुंभो धनसमृद्धिदः मी
नो दुःखप्रदो नित्यमेवं राशिफलं प्रिये योगा
श्च प्रीतिरायुष्मान् सौभाग्यः शोभनः शुभः
सुकर्मा च धृतिर्वृद्धिर्ध्रुवः सिद्धिश्च हर्षणः व
रीयांश्च शिवः सिद्धिर्ब्रह्मा चैंद्रश्च षोडश इति
शुक्लपक्षे प्रकुर्वीत कृष्णे वा देशिकोत्तमः शु
क्ले सर्वसमृद्धिः स्यात् कृष्णे मध्यमतो भवेत् द्वा
दश्यामपि कर्तव्यं त्रयोदश्यामथापि च महाभ
वचतुर्दश्यामुपराभोश्च चतुर्दयोः ददन्मंत्रं भवे
न्मंत्री दरिद्रः सप्तजन्मसु धर्मदः प्रातःकालः
स्यात् संगवो राज्यदः स्मृतः मध्याह्ने सर्वसिद्धिः

प्र·च·
सा·
८

स्यात्तायाङ्केमध्यमोभवेत् रजतीमंत्रदानेतुति
थिस्वादेशिकोत्तमैः सूर्यग्रहणकालेतुनान्यद
न्वेषितंभवेत् मलमासंविवर्जयेदिति अथमं
त्रदेवताप्रकाशिकोक्तप्रकारेणमासादिनिय।
मोलिख्यते तत्रमासफलानिज्ञात्वाशुभकाले
दीक्षाकर्तव्या अश्विनिर्हिर्भूमिसंपत्तिर्मार्गाबंधु
नाशनं आषाढेहिः प्रजानाशः संपदोत्तत्रसंप
दः शुभप्राप्तिःस्यात्तत्राश अमोघार्थावशी
कृतिः एवंचैत्रादिमासानांफलान्याहुर्मनी।
षिणः तत्रादौगुरुमंत्राणांशिष्यस्यनक्षत्रादि
कोष्टानांफलंपरीक्ष्यदीक्षांकुर्यात् तत्रनक्षत्र
परीक्षा राज्यलाभोपकारायप्रावभ्यारीखरः
कुरु गोपालककुटीप्रायात्फलावेत्तुदिता
लिपिः नक्षत्रेशुक्रमाद्योज्यास्वरान्त्योरेवतीषु।
तो अस्यार्थः रेवतीनक्षत्रशुक्रोभवतः राइति
द्वयं· ज्यइत्येकं· लाइतित्रीणि· भोइतिचतुष्ट।
यं· पइत्येकं· काइत्येकं· राइतिद्वयं· यइत्येकं·
प्राइतिद्वयं· वइतिद्वयं· भ्याइत्येकं· रीइतिद्वयं·
खइतिद्वयं· खइतिद्वयं· रइतिद्वयं· कुइत्येकं·
रुइतिद्वयं· गोइतित्रीणि· पाइत्येकं· लइतित्रीणि ·

कइतिपकं·कुइत्येकं·टीइत्येकं·प्राइतिद्वयं·यादित्ये
कं· त्कइतिद्वयं· लाइतित्रीणि· वइतिचतुष्टयं पत
ङ्कंभवति अश्वाअश्विनी इभरणी ईङकृत्तिका
अटअटलल्लरोहिणी पम्टगशीर्ष येआर्द्रा ओञे
पुनर्वसुः कपुष्यः (वगआश्लेषा चड·मघा वपू।
र्वाफाल्गुनी छजउत्तराफाल्गुनी जगहस्त
टटचित्रा ङस्वाती छणविशाखा तयदअनुरा
धाधज्येष्ठा तयफमूलं वपूर्वाषाढा भउत्तरा
षाढा मश्रवणः यधनिष्ठा लशतभिषक् व
पूर्वाभाद्रपदा षसहउत्तराभाद्रपदा लदत्रेम्
रेवती इत्येवमक्षरैरुक्तनक्षत्राणि ज्ञात्वा मेषाद्यक्षरे
णात्मनामाद्यक्षराद्यानुकूल्यं ज्ञातव्यं जन्मसंप
द्विपत्क्षेमप्रत्यरिः साधको वधः मैत्रं परममैत्रं च
नवैतानि पुनः पुनः इति नक्षत्रयुक्तानि ज्ञातव्या।
नि अथ राशिपरीक्षा वेलागरु खरः मोणः पा
र्मणोवेलिभेदितः लिप्याणि शिष्टज्ञेयाः षट्भेषा
दीक्षायोजयेत् अथार्थः वेइति चतुष्टयं लाइ
तित्रीणि गइतित्रीणि रुइतिद्वयं खइतिद्वयं रइ
तिद्वयं मोइतिपंच णइतिपंच शइतिपंच णइइ
तिपंच वेइतिचत्वारि पतङ्कंभवति अथार्थ।

प्र॰च॰
सा॰
१८

ई मेषः उऊऋ इति वृषः ॠऌॡ इति मिथुनं
एऐ कर्कटकः ओऔ सिंहः अंअः शषसहळ।
क्षाः कन्या कवर्गस्तुला चवर्गो वृश्चिकः टव
र्गो धनुः तवर्गो मकरः पवर्गः कुंभः यरलवा मी
नः एकपंचनववंधुवत्तकाः द्वे च षष्ठदशमास्त्र
सेवकाः त्रीणि रुद्रगणसप्त पोषकाः द्वादशाष्ट
चतुरस्तु घातकाः जपेन वंधुः सिद्धः स्यात्सेवया
च ससेवकः मंत्रः सपोषको ज्ञानात्तथा घातयेत।
सघातकः एवमन्त्रेष्वपि ज्ञात्वा फलानि ज्ञा
तव्यानि अथ भूतलिपि परीक्षा अ इ उ ऋ ऌ पं
चवर्णाः क्रमेण वाय्वग्निभूमिजलाकाशात्म
कास्तथा आ ई ऊ ॠ ॡ पंचवर्णास्तथा एऐओ
औ अं इति पंचवर्णास्तथा कचटतप पंचवर्गा
श्च यरलवशाः पंचवर्णाश्च षक्षलसहः पंचव।
र्णाश्च वाय्वग्निभूमिजलाकाशात्मका भवंति
तदुक्तं ह्रस्वाः पंच परेऽथ संधिविकृताः पंचाथवि
द्वैतिकाः काद्याः प्राणहुताशभूकाखमया याद्याः
शावर्णांतिकाः ह्रांताः षक्षलसाः क्रमेण कथिता
भूतात्मकास्तेषु पृथक् तैस्तैः पंचभिरेव वर्णैर्दशांकैः
स्युः स्तंभनाद्याः क्रिया इति साधकाख्यानं तत्र पूर्वं

मंत्रस्यापि तद्वत्त्वं यद्येकभूतदैवत्यं जानीयात्स्वकुले
स्थितं पार्थिवे वारुणं मित्रमाग्नेयस्यापि मारुतं माहेंद्र
वारुणानां च शत्रुत्वे मारुतः स्थितः आग्नेये वारुणं शत्रु
वारुणे तैजसं तथा एतेषामेव सर्वेषां सामान्यत्वेन ना
भसं मातृवत्तंत्रविद्यानामविरोधे सदा स्थितं एवं पं
चभूतबलं ज्ञेयं अथ सिद्धसाध्यसुसिद्धारिपरीक्षा
र्थं कोष्ठक्रमः कथ्यते तत्र चतुष्पदयुक्त कोष्ठचतु
ष्टयं कृत्वा तत्र कोष्ठचतुष्टयाद्यपदेषु चतुर्षु प्रादक्षि
ण्यक्रमेण अकारादिस्वरचतुष्टयं लिखेत् द्वितीयेषु
उकारादिः तृतीयेषु लृकारादिः चतुर्थेषु ओकारादि।
लिखेत् अवशिष्टानपि तथा एवमेव प्रदक्षिणक्र
मेण ककारादिनकारांतान् षोडशवर्णान् षोडशवर्णा
न् विलिख्य पुनस्तेनैव क्रमेण थकारादिसकारांतान् अ
षोडशवर्णान् विलिख्य हलक्षस्त्ववशिष्टवर्णत्रयं
प्रोक्तक्रमेण प्रथमद्वितीयतृतीयकोष्ठाद्यपदेषु वि
लिखेत् तत्र कोष्ठचतुष्टये स्वनामाद्यवर्णो यत्र कोष्ठे ति
ष्ठति तत्कोष्ठमादिं कृत्वा प्रदक्षिणक्रमेण सिद्धसाध्य
सुसिद्धारीन् कल्पयेत् तत्रापि स्वनामवर्णयुक्तको
ष्ठांतरात् चतुष्पदेष्वपि तथाविधपदमादिं कृत्वा सि
द्धपूर्वकं सिद्धादिचतुष्टयं कल्पयेत् द्वितीयकोष्ठ

चतुष्टयेष्वपि स्वनामादिवर्णयोगि पदसमसंख्याकं
पदमादिं कृत्वा॰ क्रमेण साध्यपूर्वकसिद्धादिचतुष्ट
यं कल्पयेत् एवं तृतीयकोष्ठपदचतुष्कादेष्वपि तथा
विधमादिं कृत्वा सुसिद्धपूर्वकसिद्धादिचतुष्टयं क
ल्पयेत् तथा चतुर्थकोष्ठचतुष्कादेष्वपि तथाविधमा
दिं कृत्वा अरिपूर्वकसिद्धादिचतुष्टयं कल्पयेत् ए
तेषु षोडशस्थानेषु मध्ये मंत्राद्यवर्णीयकोष्ठपदे तिष्ठ
ति तत्कोष्ठपदनामांकितः स मंत्रो भवति एतत्कोष्ठ
गतफलमुच्यते सिद्धः सिध्यति कालेन साध्यः सि
ध्यति वा न वा सुसिद्धस्तत्क्षणादेव अरिर्मूलं निकृं
तति सिद्धसिद्धो यथोक्तस्तु द्विगुणात् सिद्धसाध
कः सिद्धः सुसिद्धोर्द्धजपात् सिद्धारिर्हंति गोत्रजान्
साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः सा
ध्यसुसिद्धोर्धजपात् साध्यारिर्हंति गोत्रजान् सुसि
द्धसिद्धोर्धजपात् तत्साध्यः साधिकाज्जपात् ग्रहणा
न्तत्सुसिद्धस्तु तदरिर्ज्ञातिहा भवेत् अरिसिद्धः सुतं
हन्यादरिसाध्यस्तु कन्यकां पत्नीमरिसुसिद्धस्तु।
शत्रुशत्रुर्यमान्महा दुष्टलक्षणाभिभूतारिवर्णप्रचुरमं
त्रकं सम्यक् परीक्ष्य तं यत्नान्न वर्जयेन्मतिमान्नरः
आदेसिद्धस्थाने च सर्वसिद्धिफलप्रदः आदा।

वंते भवेत्साध्यः कृच्छ्रसाध्यस्तदा स्मृतः आदावंते सुसिद्ध
स्तु तिष्ठमेव प्रसिध्यति आदावंते रिपुर्यस्तु साधकं सनि
कृंतयेत् आदौ सिद्धोत्यसाध्यो यो द्विगुणेन स सिध्यति
आदौ साध्यः सुसिद्धोंते प्रोक्तमार्गेण सिध्यति सुसिद्धा
दिस्तु साध्यांतस्थस्तद्गुणमपेक्षते आद्यंतयोर्यदा सिद्धो
मध्ये साध्यः प्रजायते आद्यंतयोर्यदा साध्यो मध्ये सि
द्धः प्रजायते तावुभौ साध्यसिद्धौ द्विजपादिकेन सिध्यत
आद्ये सिद्धे न संदेहः सुसिद्धेन तथांततः श्रवणादेव
सिध्येत साधकस्य न संशयः सिद्धांतरित साध्यस्तु सु
सिद्धांतरितोऽथवा शीघ्रं सिध्यति मंत्रोवै यथोक्तं मंत्रवि
त्तमैः सिद्धेनांतरितः शत्रुः सुसिद्धेनापि चेद्भवेत् ना
सौ रिपुर्भवेन्मंत्रः किं तु कृच्छ्रेण सिध्यति साध्येनांतरि
तः सिद्धः सुसिद्धोपि तथा यदि सिध्यत्यतीव कष्टेन सा
धकस्य न चान्यथा रिपुणांतरितं सिद्धं सुसिद्धं च तथा
त्यजेत् रिपुणांतरितो मंत्रोमेव ग्राह्यः कदाचनः नामा
द्यं समारभ्य यावन्मंत्रादिदर्शनं त्रिधा कृत्वा स्वरैर्यु
त्वा तद्वद्विपरीतकं कृत्वाधिकः ऋणी ज्ञेय ऋणीव
मंत्रतत्तमः स्वयमृणी चेत् तन्मंत्रं त्यजेत् पूर्वं ऋणी
यतः त्रिभिर्गुणित्वा सप्तभिर्हरेत् तद्विपरीते सप्तभि
र्गुणित्वा त्रिभिर्हरेदितपर्यः तत्र शर्मप्रसिद्धनाम्नो

प्र॰ व॰ मंध्येकिंवाग्राह्यमित्याकांक्षायांकल्पान्तरेप्रोक्तं
सा॰ प्रसिद्धनामनक्षत्रीयात्स्मोधेनचजागरयादिति
२॰ तत्रापवादउच्यते प्रणवस्यत्वरीमायाव्योमव्या
पीषडक्षरः प्रासादोवहुरूपीचसप्तसाहोवहुरूपी
चसप्तसाधारणाःस्मृताः सौरमंत्राश्चयेपिस्युर्वैष्णवा
नारसिंहकाः सिद्धसाध्यस्तुसिद्धारिविचारपरिवर्जि
ताः नृसिंहार्कवराहाणांप्रासादप्रणवस्यच सपिं
डाक्षरमंत्राणांसिद्धादीन्नैवशोधयेत् एकाक्षरस्य
मंत्रस्यमालामंत्रस्यपार्वति वैदिकस्यचमंत्रस्यसि
द्धारीन्नैवशोधयेत् हंसस्याष्टाक्षरस्यापितथापं
चाक्षरस्यच स्वप्नदत्तस्यमंत्रस्यस्त्रियादत्तस्यचैव
हि नपुंसकस्यमंत्रस्यसिद्धारीन्नैवशोधयेत् एक
द्व्यादिवीजस्यसिद्धारिंनैवशोधयेत् अकारा
दिक्षकारांतैर्विंदुमन्मातृकाक्षरैः अनुलोमवि
लोमस्थैःक्रमयावर्णमालया प्रत्येकवर्णसंयु
क्ताजप्ताःस्युःसर्वसिद्धिदाः वैरिमंत्राश्चपिस्टणा।
मन्येमंत्राश्चकिंपुनः मंत्रादिषुचसर्वेषुरुद्रलेखां
कामवीजकं श्रीवीजंवाविनिक्षिप्यजपेन्मंत्रवि
शुद्धये तावसंपुटितोवापिदुष्टमंत्रोपिसिध्यति
स्त्रीपुंनपुंसकत्वेनत्रिधास्युर्मंत्रजातयः स्त्रीमंत्रा

वह्निजायांता नमोंताश्च नपुंसकाः शेषाः पुमां
सस्ते शस्ता वश्योच्चाटनकेषु च। क्षुद्रक्रियायां
विध्वंसे स्त्रियोन्येषु नपुंसकाः तारांत्योग्निवियद
त्प्रायो मंत्र आग्नेय इष्यते शिष्टः सौम्यः प्रशस्तौ
तौ कर्मणोः क्रूरसौम्ययोः आग्नेयमंत्रः सौम्यः।
स्यात्प्रायशोंते नमोन्वितः सौम्यमंत्रस्तथाग्नेयः
फट्कारेणान्वितोंततः स्वापकालो वामवहो
जागरो दक्षिणावहः आग्नेयस्य मनोः सौम्यमंत्र
स्यैतद्विपर्ययः प्रबोधकालं जानीयादुभयोरु
भयोर्वहः स्वापकाले तु मंत्रस्य जपोनर्थफला
वहः वश्याकर्षणसंतापे होमे स्वाहां प्रयोजये
त् क्रोधोपशमने शांतौ पूजने च नमो वदेत् वौ
षट् संमोहनोद्दीपपुष्टिमृत्युंजयेषु च ॐकारं प्री
तिनाशे च छेदने मारणे तथा उच्चाटने च विद्वेषे
तथाधी विकृतौ च फट् विघ्नग्रहविनाशे च हुं फट्
कारं प्रयोजयेत् मंत्रोद्दीपनकार्ये च लाभालाभे
वषट् स्मृतः एवं कर्मानुरूपेण तत्तन्मंत्रं प्रयोज।
येत् ग्रथितादिप्रभेदश्च मंत्राणां वक्ष्यते पुनाग्र
थितं संपुटं ग्रस्तं समस्तं च विदर्भितं तथा चा।
क्रांतमाद्यंतं गर्भस्थं सर्वतोवृतं तथायुक्तविदर्भं

प्र॰ च॰ च विदर्भग्रथितं तथा इत्येकादशधा मंत्राः प्रयु-
सा॰ क्ताः कार्यसिद्धिदाः साध्यनामार्णमेकैकं मंत्रार्णो
२१ संप्रचोदितं ग्रथितं तत्समाख्यातं वश्याकृष्टिक
रं परं मंत्रमादौ वदेत्सर्वं साध्यसंज्ञानमंतरं विप
रीतं तु तत्प्रोक्तं मंत्रं तत्संपुटं स्मृतं शांतिपुष्टिक
रं ज्ञेयं त्रैलोक्यैश्वर्यदायकं अर्द्धमर्द्धं तथाद्यंते
मंत्रं कुर्याद्विचक्षणः मध्ये चास्य भवेत्साध्यं ग्रस्त
मित्यभिधीयते आभिचारेषु सर्वेषु योजयेन्मा
रणेषु च अभिधानं वदेत्सर्वं पश्चान्मंत्रं तथा वदे
त् एतत्समस्तमित्युक्तं घातृच्चाटनकारकं द्वौ द्वौ
मंत्राक्षरौ यत्र एकैकं साध्यवर्णकं विदर्भितं तदुक्त
मोक्तं उच्चवश्यपरक्षणं मंत्रेणान्वितं साध्यंस
मंतान्निरुद्धं यदि आक्रांतं तद्धि जानीयात्सद्यः स
र्वार्थसिद्धिदं क्षोभस्तंभसमावेशावश्योच्चाट
नकर्मणि सकृत्सर्वं वदेन्मंत्रं अंते चैव तथा पुनः
मध्ये चास्य भवेत्साध्यमाद्यंतमिति तद्विदुः अन्ये
त्वप्रीतिपुष्कलानां विद्वेषणकरं परं आदौ चांते तथा
मंत्रं द्विवारं संप्रयोजयेत् साध्यनाम सकृन्मध्ये ग
र्भस्थं तन्न दृश्यते मारणोच्चाटने वश्यं प्रयुक्तं कारये
त्पणं हेति मोसेत्यधीगर्भस्तंभनं च गतेस्तथा त्रि

थामंत्रंवदेत्सर्वंतथैवांतेपुनस्त्रिधा सकृत्साध्यंव
देन्मध्येतद्विधात्सर्वतोवृतं सर्वोपसर्गशमनंमहा
स्त्रनिवारणं सर्वसौभाग्यजननंस्ततानामस्त
प्रदं आदौमंत्रंततोनामपुनर्मंत्रंसमालिखेत् एव
मेवत्रिधाकृत्वाभवेद्युक्तिविदर्भितं पूर्ववत्कथितं
चान्यतस्याद्यंतेप्रकल्पयेत् विदर्भग्रथितंनाममंत्र
लक्षणमुत्तमं सर्वकर्मकरंप्रोक्तंसर्वैश्वर्यफलप्र
दं एवमेतेप्रयोगाःस्युःसिद्धमंत्रस्यसिद्धिदाः एव
मन्येष्वपुभेषुमासेषूपदेशंकुर्यात् तत्रप्रथमेप्रा ।
कृपंचमषष्ठयोःपटलयोःउक्तेनमार्गेणवादी ।
क्षाहोमकलशादीन्कृत्वातत्रमंत्रोक्तिसमयेसं
कोचेनकेवलकलशमात्रकृतप्रकारेणवास्मिन्ने
वपटलेउपरिवक्ष्यमाणमातृकावर्णौषधीनाम ।
ध्येतन्नत्साध्यमंत्राणांयेवर्णास्तेषामेवौषधानिग ।
हीत्वाक्वाथयित्वाकेवलंनिष्पीड्य आर्द्रीकृत्यतेन
जलेनवाउपरि अष्टमेपटलेस्वधंवरणविधानेन
वक्ष्यमाणदशमूलपुष्परसैर्वा अष्टवर्गस्यवातदु
त्वस्त्वग्भिर्निवःक्वाथयित्वातैर्जलैर्वापुष्पजले
र्वापुष्पजलैरेववाकलशमाहृत्यउपरिसप्तविंश
तिपटलेप्रसंगात् वक्ष्यमाणपत्न्यंतरविधानेवक्ष्य

प्र॰च॰
सा॰
२२

माणकलशस्थामात्मष्टजाक्रमेणतन्मंत्रविधा
नोक्तविशेषपूजाक्रमेणचसंपूज्यगुरुः शिष्यम।
भिषिंच्यमंत्रमुपदिशेत् अथवाचिदंबरकल्पो
क्तप्रकारेणदीक्षांकुर्यात् तत्प्रकारउच्यते संपू
ज्यदेवंपूजांतेशिष्यमाहूयसद्गुरुः स्वर्णभूषैरर्च
यित्वादेवं तत्रप्रणामयेत् शंखतोयेनसंप्रोक्ष्य
पुरतःस्थापयेत्तं स्वयंपरशिवोभूत्वानिःसंदि
ग्धमनागुरुः निजहस्तेनशिष्यस्यममंत्रंमूर्द्धि
नंस्पृशेत् स्पर्शदीक्षेतिसाप्रोक्तामलत्रयविमोचि
नीति अथवाप्यपरदातिलकोक्तप्रकारेणदीक्षां
कुर्यात् अथवर्णात्मिकांवक्ष्ये दीक्षामागमचोदि
तां उप्रकृत्यात्मिकावर्णाःशरीरमपिताहशं यत
स्तस्मात्तत्संन्यस्येद्वर्णान् शिष्यस्यदेशिकः तत्र।
स्थानसुतान्वर्णान्प्रतिलोमेनसंहरेत् स्वज्ञाने
देवताभावविधानाद्देशिकोत्तमः तदाविलीनतत्वो
यंशिष्योदिव्यतनुर्भवेत् परमात्मनिसंयोज्यतच्चैत
न्यंगुरुर्धिया पश्चादुत्पादयेत्तान्वर्णान्न्यस्येच्छिष्यत
नौपुनः सृष्टिक्रमेणविधिवच्चैतन्यंचनियोजयेत्
जायते देवताभावःपरानंदमयःशिष्योः निहृत्निर्जी
नपर्यंतंतत्लाघारभ्यसौस्थिता ज्ञानतोनाभिपर्यंतं

प्रतिष्ठाव्याप्यसंस्थिता नाभेःकंठावधिव्याप्ताविद्या
शांतिस्ततःपरं कंठाल्ललाटपर्यंतंव्याप्तातस्माच्छि
रोवधि शांत्यतीतकलासेयाकलाव्याप्तिरितीरिता
संहारक्रमयोगेनस्थानात्स्थानांतरेगुरुः संयोज्यवे
धयेद्विद्वानाज्ञयाततःशिवावधि इयंप्रोक्ताकलादीक्षा
दिव्यभावप्रदायिनी ततोवेधमयींवक्ष्येदीक्षांसंसा
रमोचनीं ध्यायेच्छिष्यतनोर्मध्येमूलाधारेचतुर्दले
त्रिकोणमध्येविमलेतेजस्त्रयविजृंभिते वलित्रि
तयसंयुक्तांतडित्कोटिसमप्रभां शिवशक्तिमयींदे
वींचेतनांमंत्रविग्रहां सूक्ष्मात्सूक्ष्मतरांशक्तिंभि
त्वाषट्चक्रमंजसा गच्छंतीमध्यमार्गेणदिव्यांपरशि
वावधि वादिसांतान्दलस्थार्णान्संहरेत्कमलास
नेतंषट्पत्रमध्येपभेवादिलांताक्षरान्विते स्वाधिष्ठा
नेसमायोज्यवेधयेदाज्ञयागुरुः तान्वर्णान्संहरेद्धि।
सोऽतंपुनर्नाभिपंकजे दशपत्रेडादिफांतान्वर्णांश्च
योजयेद्गुरुः तान्वर्णान्योजयेद्भद्रेतंपुनर्हृदयां
बुजेकादिठांतार्कपत्राढ्येयोजयित्वास्मरेद्गुरुः तान्
वर्णान्संहरेत्तस्मिंस्तंभूयःकंठपंकजे स्वराढ्येषो
डशदलेयोजयित्वास्वरान्पुनः सदाशिवेतान्सं।
हृत्यतंपुनर्भ्रूसरोरुहे द्विपत्रेहक्षलसितेयोजयेत्।

प्र·व·
सा·
२२

त्वा तयोर्गुरुः तदाऽसौ संहरेद्धृदि दीकलाद्यां तंतियोज
येत् तां नादे तं तथा नादं नादांते योजयेद्गुरुः तद्यापि
न्यां समाधायोन्मविलयवक्त्रांतरे चतां तस्य तद्गुरुवक्त्रेव
योजयेद्देशिकोत्तमः स हैवमात्मना शक्तिं वेधयेत्पर
मे शिवे गुर्वाज्ञया छिन्नपाशस्तदा शिष्यः पतेद्भुवि
संजातदिव्यबोधोऽसौ सर्वं वदति तत्क्षणात् साक्षा।
च्छिवो भवत्येष नात्र कार्या विचारणा एषा वेधमयी दी
क्षा प्रोक्ता संवित्प्रदायिनी क्रमात्सूत्रविधादीक्षां तंत्रे।
स्मिन्नस्त्रदीरिता कल्पांतरे प्रोक्तं गुरोरालोकमा
त्रेण भाषणात्स्पर्शनादपि सद्यः संजायते ज्ञानं सा
दीक्षा शांभवी स्मृता चित्तं तत्त्वे समाधाय परतत्त्वोप
बृंहिताम् उच्चरेत्संहृतान्मंत्रान् वादीक्षेति निगद्यते
निमील्य नयने ध्यात्वा परतत्त्वे प्रसन्नधीः सम्यक्प्रप
श्येद्गुरुः शिष्यं दृग्दीक्षा सा भवेत्प्रिये तत्र दीक्षा कल
शाभिषेकं स्तोति संक्षेपादिति कथिता हिताय दी
क्षा जन्तूनां प्रवरफलप्रदा विराय प्राप्येतां जपवि।
धिनादरेण कार्यो विद्वद्भिः सद्भक्तविधिर्निजेष्टसिद्ध्यै
प्रोक्तेनैवं कलशविधिनैकेनवानेककुंभैर्भक्त्यायो
वा स्नातिरभिषिचेन्नरो मंत्रजापी कामान्स प्राप्नोत्य
यमिह परत्रापि किं तत्र चित्रं लोके श्रींत्योनवल्लमणि

मंत्रौषधीनां प्रभावः अनेककंभेरिति पंचनवपंच
विंशत्यादिसंख्याकैरित्यर्थः पुनस्तस्मिन्नुपदेशसम
ये पूर्वं गुरुप्रणामविधिं वक्ष्ये दोर्भ्यां पदाभ्यामंसा
भ्यामुरसा शिरसा दृशा मनसा वचसा चेति प्रणामो ऽ
ष्टांग ईरितः बाहुभ्यां च सजानुभ्यां शिरसा वचसा धि
या पंचांगकः प्रणामः स्यात् पूजासु प्रवराविमौ एवम
ष्टांगनमस्कारं पंचांगनमस्कारं वा कृत्वा गुरुमुपस
र्प्य दक्षिणां च दद्यात् तत्संख्याविशेष उच्यते वासःसी
च पुनरंगुलिभूषां होमकृत्समन्तजपप्रवरेषु ईप्सितार्प
णमिति प्रतिदत्वा वर्हिर्तों हिरण्यं स्वेरितं वाभिः ना
त्वा पुनस्तस्मै परमात्मने स्वं द्रव्यादिमेव गुरवे चतु
र्थांशकं वा दत्वा दशमांशमथवापि च वित्तशाठ्यं हि
त्वार्पयेन्निजतनुं तदधीनचेता एवं गुरुदक्षिणां कृत्वा
दीक्षाकलशमभिषेचयित्वा पश्चाद्दक्षिणां दत्वा वा उ
पदेशं गृह्णीयात् पुनरुपदेशविधिस्तद्ग्रहणविधि
श्चोच्यते तत्र पूर्वं गुरुः शिष्यं षडंगादीन्कारयित्वा प
श्चान्मंत्रं शिष्यायोपदिशेत् तदुक्तं च रहस्योपनिषदि
अंगहीनानि वाक्यानि गुरुर्नोपदिशेदयः शंकरभाष्ये
देवताधिकरणे ऽप्युक्तम् यो ह वा अविदितार्षेयच्छंदोदै
वतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणु

प्र॰च॰ वक्ष्यतिगर्भेवापद्यते तस्मात्तेतानिमंत्रेविंद्यादिति
सा॰ उक्तरूपाभ्यां गुरुशिष्याभ्यां तस्मिन्समयेकर्त्तव्य
२५ विशेषोऽस्मिन्नेवकल्पेषष्टपटलांते उक्तः विमले
परिधायवाससीशुचिराचम्यगुरुं प्रणम्यच निकटे
24 सन्नुपासीनोवदेदथशिष्यस्यमन्त्रंत्रिशोगुरुः गुरुणा
समनुगृहीतंमंत्रंसद्योजपेच्छतावृत्त्या गुरुदेवताम
न्नूनामैक्यंसंभावयन्धियाशिष्यः मंत्रेमंत्रगुरावपि
मंत्रीमंत्रस्यदेवतायांच त्रिषुविहितसततभक्तिःप्रत्ये
हृतिजेभितंलभते तत्रगुरुदेवतामन्नूनामैक्यमिति
गुर्वादीनामात्मनापैक्यमनुध्यायन्नित्यर्थः तदुक्तंराम
कल्पे देवतागुरुमंत्राणांभावयेदैक्यमात्मना एवंसं।
चिंतयन्मंत्रीमंत्रंप्रतिदिनंजपेत् इति उपदेशानंतरंगु
रुः स्वशक्तिंद्दानानवाप्येयेमहत्स्वंजप्यादितिसंप्रदायः
क्रमदीपिकायामप्येवमेवोक्त उपदेशविधिः ॥ परि
हितसितवसनद्वितयोवाचंयमः समाचान्तः वद्धशः
प्रणम्यदेशिकनामाने हरिमप्युपसंगृह्य तद्दक्षिण
उपान्तमाभिमुखमेकाग्रमानसः शिष्यः न्यासैर्यथा
विधितमनुतसाहिधायगंधाक्षतादिभिरलंकृतव
र्पाणोस्य ऋष्यादियुक्तमप्यमंत्रवर्णंयथावदया त्रिशो
गुरुरनघ्यमवामकर्णे गुरुणाविधिवत्प्रसादितंतम।

न्नुमस्तोर्ध्वशान्तं प्रजप्य भूयः अभिवंद्य ततः प्रणतं तु स
म्यक् समयान् भक्तिभरावनम्रमूर्तिः दत्वा शिष्याय म
न्त्रं न्यस्त्वाथ गुरुं कृतात्मयजनविधिः अशेषमंत्रं सहृदं
स्वशक्तिहृत्तान्तवामयेजप्यादिति मंत्रदेवताप्रकाशि
कायामुक्तं अथाचार्यः शिष्येण गुरुभक्तिनमस्कारा
दिकारयित्वा शिष्यस्य देहे प्रणवमातृकाभुवनेश्वरी
न्यासपूर्वके विघ्नेश्वरसरस्वतीमूलमंत्रन्यासं कृत्वा स्व
हृदये स्थितां तेजोमयीं मंत्रमूर्तिं दीपाद्दीपांतरन्याये
नास्य तन्नाडीमार्गतो निर्गमय्य शिष्यहृदये प्रविष्टां
चिंतयन् तन्मस्तके अस्त्रमयं स्वहस्तं निधाय तद्द
क्षिणकर्णप्रदेशे मंत्रं त्रिवारमुच्चार्य्या ऽऽवयोरयं मं
त्रः सिद्धोऽस्त्वित्युपदिशेत् तत्र स्त्रीशूद्रयोस्तु प्रणवे
वैदिकमंत्रं च विना मंत्रांतरमुपदिशेत् तत्र प्रणव
स्थाने चतुर्दशस्वरानुस्वारमोंकारं योजयेत् अथ सर्वमं
त्राणां ग्रहणे गुरोरसंभवे कल्पांतरोक्तप्रकारेण ॥
उपायविशेषो लिख्यते गुरोरभावे मंत्राणां ग्रहणे
क्रममुच्यते कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्नि
धौ लिखित्वा राजते पत्रे तालपत्रेप्यथवा पुनः मंत्रं तं स्थं
डिले स्थाप्य पूजयित्वा महेश्वरं पायसादि निवेद्य च
कृत्वा तं प्रणिपत्य च स्नानं कृत्वा पठेन्मंत्रं दक्षिणामूर्ति

प्र॰च॰ सन्निधौ सर्वेषां चैव मंत्राणामेवं ग्रहणमिष्यते अथ
सा॰ वा नद्यास्तु सिंधुगामिन्यास्तीरे चैव नरसंस्थिते स्थं
२५ डिलेकामयेत्तत्र शुचौ देशे शुभे दिने तालपत्रे लिखि
त्वा तु मंत्रं तत्र निधाय च आवाह्य भास्करं तत्र यथावि
25 धि तु पूजयेत् तत्सन्निधावष्टशतं पठेद्देशिकतोय
था एवं गृहीतमतिमान् पूर्वोयं विधिः स्मृतः ।
इति मंत्रग्रहणोपायः एवं यथोक्तलक्षणगुरोर्मं
त्वा तु श्रुत्वा मंत्रं यथोक्ते स्थाने यथोक्ते काले यथो
क्तेन नियमेन यथोक्तेन संकल्पप्रकारेण यथोक्त
यामात्रया पुरश्चर्यां कुर्यात् गुरुलक्षणं तस्मिन्ने
व कल्पे त्रिपुराविधाने वक्ष्यति तत्संप्रदायाद्गुरोर्ल
ब्ध्वा मंत्रमिमं जपन्निति विस्तरेण द्वात्रिंशत्पटले व
क्ष्यति स्थाननियमं तत्स्वदर्शनविधाने वक्ष्यति समु
द्रतीरे पर्वते वाद्रिशृंगे समुद्रगानां सरितां च पारे जये
द्धि विके निजपवगेहे विष्णोर्गेहे वा पुलघे मनस्वी
ति क्रमदीपिकायामप्युक्तं अद्रेः शृंगे नद्यास्तटे
विल्वमूले हृदंभे तोये गोकुले विष्णुगेहे अश्वत्था
धस्तादंबुधेश्चापि तीरे स्थानेष्वेतेष्वासीन एकैक
शस्तु प्रजपेदयुतचतुष्कं दशाक्षरमनुवरं सप्रयत्न
मशाइति शिवगीतायामप्युक्तं ॥ विल्वहृदंसमा

श्रित्ययोमंत्रान्विविधान्जपेत् एकेनदिवसेनैवतत्
त्पुरश्चरणंभवेत् यस्तुविल्ववनेनित्यंकुटींकृत्वाजपे
न्नरः सर्वेमंत्राः प्रसिध्यंतिजपमात्रेणकेवलं पर्वताग्रे
नदीतीरेविल्वमूलेशिवालये अग्निहोत्रेकेशवस्यस
न्निधौवाजपेत्तुयः नैवास्यविघ्नंकुर्वंतिदानवायक्षरा
क्षसाः तेनस्पृशंतिपापानिशिवसायुज्यमश्नुतेति
मंत्रदेवताप्रकाशिकायामपिपुरश्चरणविधिरुक्तः
ग्रहणेऽर्कस्येंदोर्वाशुचिः पूर्वमुपोषितः नद्यांस
मुद्रगामिन्यां नाभिमात्रांभसिस्थितः ग्रहणादिवि
मोक्षांतं जपेन्मंत्रंसमाहितः अनंतरं दशांशेनक्रमा
द्धोमंसमाचरेत् तदंतेमंत्रसिद्ध्यर्थंगुरुंसंपूज्यतोषये
त् ततश्चमंत्रसिद्धिःस्याद्देवताचप्रसीदति अथवादेव
तारूपंगुरुंभक्त्याप्रतोषयेत् पुरश्चरणहीनोपिमंत्र
सिद्धोनसंशयः एवंसाधितमंत्रस्तुकाम्यकर्माण्यथा
चरेत् तत्तत्तंत्रोक्तमार्गेणकाम्यसिद्धिस्ततोभवेत् ॥
कालनियमस्तुरामकल्पेउक्तः सर्वेषांमनूनांमूला
नांनित्यनैमित्तिकात्मनां कर्मणामविरोधेषुकालेषु
जपउच्यते शिवगीतायामप्युक्तं ब्राह्मंमुहूर्तमार
भ्ययाममध्याह्नं अतऊर्ध्वंकृतेजापेविनाशोभवतिध्रुवं
पुरश्चर्याविधावेवंसर्वकामफलेष्वपि नित्यनैमित्ति

प्र॰च॰ केवापितपश्चर्यास्त्ववापुनः सर्वदेवेजपः कार्योन।
सा॰ दोषस्तत्रकश्चनेति नियमस्तु क्रमदीपिकायामुक्तः
२९ कृत्वास्नानाद्यं कर्मदेहार्चनांतं पश्चाश्रित्यप्रागीरितं
त्रिसंध्यः देहार्चनंनामवाह्यपूजावत् देहेऽपिमानस
जेत्यर्थः स्वहोमोमौनीसन्नब्रह्मचारीनिशाशीजप्या।
क्लांतात्मास्वष्टपमालस्तदाप्ता कुर्वन्स्वसूत्रोक्तांगोभूता
भ्यः प्रयच्छन्नग्रासान्तभूतेभ्योहरहंश्चान्नकंपं मंत्रा
धिष्ठात्रीं देवतां वंदमानोगुर्गोद्वैधिध्यांतमानेगृहं।
च कुर्वन्नात्मीयंकर्मवर्णाश्रमस्थं मंत्रंजप्याऽह्निःस्ना
नकालेभिषिंचन् आचामन्पाध्यस्तत्वसंख्याभिज।
प्तैभुजानश्चान्नंसमजपांजनाद्यमिति पुनरपिक्रम
दीपिकायामेवमेवोक्तं शाकंमूलंफलंगोस्तनभ
वदधिनीभैक्षमन्नंचसक्तुंगोड्रान्नंचेत्यदानःस्तिविष
शिवरादौक्रमात्स्यान्नभेदे पक्कैर्वेषामम्बाकैर्गादिन
मिहसयेति संकल्पप्रकारस्तु श्रीप्रपंचसारस्ये
वसनं संप्रदायसर्वस्वाभिधानेविवरणोक्तः सर्वेषां
मंत्रविद्यादीनांपुरश्चरणसमयेसाध्यदेवतां तदुक्तेन
विधानेनसमभ्यर्च्य तदग्रेतांदेवतांप्रतिदिवसमेवंसं
ख्यंजपहोमादिभिस्त्वांभजामीतिसंकल्प्यपश्चात्प्र
तिदिवसमन्यूनानतिरिक्तमनुष्ठानंविधायपरि।

४०

पूर्णे संकल्पे प्राग्वदभ्यर्च्य उरतः सांजलिः प्राग्वत्प्रति
दिवसमेवं संख्यं स्वामिन्नित्यं भजामीति विज्ञाप्य प्रतिदि
वसं जपस्य शनैः शनैर्ह्रासो ह्रा वरोहणं कुर्यात् तत्रारंभ
समये यवं क्रियत यवं क्रियत इत्यहोरात्रसंख्यान्यूनरूपे
णैव प्रार्थ्यं तथा कुर्यात् समापनसमये तद्विपरीतेन
प्रार्थ्य क्रमेण ह्रासयेदित्यर्थः तत्र मंत्रदेवताप्रकाशि।
कोक्तप्रकारेण स्यान्नियमपुरश्चरणादिविधिर्लिख्य
ते तत्र पुरश्चरणं नाम मंत्रफलसिद्ध्यर्थमनुपोचानत्वेन
पूर्वसेवनं तत्र स्थानादिनियमविशेष उच्यते पर्वताग्रे
नदीतीरे बिल्वमूले जलाशये गोष्ठे देवालयेऽश्वत्थउ
द्याने तुलसीवने पुण्यक्षेत्रे गुरोः पार्श्वे चित्तैकाग्र्यस्थ
लेपि वा पुरश्चरणकृन्मंत्री सिध्यत्येव न संशयः क्षीरा
हारी फलाशी वा शाकाशी वा हविष्यभुक् भिक्षाशी
वा भवेद्वाथ कृच्छ्रचांद्रायणादिकृत् लवणं चाम्लनालं
चगृंजनं कांस्यभोजनं तांबूलं च द्विभुक्तं पशुःसंवासं
प्रमत्तता श्रुतिस्मृतिविरोधं च जपं रात्रौ च वर्जयेत्
भूशय्या ब्रह्मचारित्वं मौनं चर्यानसूयता नित्यं त्रिषव
णस्नानं क्षुद्रकर्मविवर्जनं नित्यपूजा नित्यदानं दे
वतास्तुतिकीर्तनं नैमित्तिकार्चनं चैव विश्वासो गुरु
देवयोः नैमित्तिकार्चनं संक्रांत्यादि विशेषपूजनं जपति

म॰च॰
सा॰
२७

ष्टाष्टादशैते यमाः स्मृर्मंत्रसिद्धिदाः नित्यं सूर्यमुपस्था
य तस्य चाभिमुखो जपेत् देवताप्रतिमादौ वा वह्नौ वा
भ्यर्च्य तन्मुखः अनिर्विद्दस्तथाव्यग्रः शास्त्रोक्ताचार।
पालकः स्नानपूजाजपध्यानहोमतर्पणतत्परः
निष्कामो देवतायां च सर्वकर्मनिवेदकः एवमादींश्च
नियमान् पुरश्चरणकृच्चरेत् यदि ग्रामे जपेन्मंत्री त
त्र कूर्मं निरीक्ष्य च सिद्ध्यर्थं तन्मुखे तिष्ठेत् तत्कूर्माकृति
रुच्यते कूर्मस्यांगानि चाष्टस्य मुखे हस्तौ च पार्श्वको
पादौ पुच्छमिति प्रोक्तं प्रधानं स्यान्मुखमेव तु स्वरहंदंका।
मादिस्तु पूर्वादिष्वष्टस्वन्यसेत् तथाकादीन् समस्व
र्गान्स्मरेत् कैवदिशो विना ग्राममन्नामाद्यवर्णस्तु यस्यां
दिशि च तिष्ठति तत्र कूर्ममुखं ज्ञेयमंगानि तानि तस्त्व
वा मुखे तत्फलं विंद्यात्करयोरल्पकं फलं नैष्फ
ल्यं पादयोर्मध्ये त्वौदासीन्यं तु पार्श्वयोः वधबंधन।
दुःखानि पुच्छदेशे भवंति च इत्थं ज्ञात्वा कूर्मं चक्रं त।
त्कर्माणि साधयेत् आसनस्थो जपेत्सम्यक् मंत्रार्थ
गतमानसः कौशेयं चर्म वैयाघ्रं चैलं तैलमथापि
वा दारवं तालपत्रं वा कांबलं दार्भमासनं प्रायेष्टका
पमथ वा गो तृणपल्लवनिर्मितं वर्जयेदासनं मंत्री
दारिद्र्यव्याधिदुःखद वीरं वा स्वस्तिकं वापि बध्वा

27

स्वतद्रदासनं उदङ्मुखः प्राङ्मुखो वा जपहोमादि
कं चरेत् पद्मं वा स्वस्तिकं वापि वध्वा ध्यानादिकं चरेत्
एकं पादमथैकस्मिन्विन्यस्योरुणि संस्थितः इतर
स्मिंस्तथा चोरुं वीरासनमुदाहृतं जान्वोर्वैतरा सम्य
क् कृत्वा पादतले उभे ऋजुकायः समासीनः स्वस्ति
कं तत्प्रचक्षते सीवन्याश्चात्मनः पार्श्वे गुल्फौ निक्षि
प्य पादयोः सव्ये दक्षिणगुल्फं तु दक्षिणे दक्षिणेतरं
एतद्वा स्वस्तिकं प्रोक्तं सव्ये न्यस्येतरं करं अंगुष्ठौ चाव
बध्नीयात् हस्ताभ्यां व्युत्क्रमेण तु ऊर्वोरुपरि विप्रेन्द्र
कृत्वा पादतले उभे पद्मासनं भवेदेतत्सर्वेषामपि पूजि
तं संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु सव्यतः सव्यं
दक्षिणगुल्फेन तु मुक्तासनमुदीरितं एवमासनबद्धः
सन्नद्भूतशुद्धिं समाचरेत् पृथिव्या मेरुपृष्ठ ऋषिः ।
सुतलं छन्दः कूर्मो देवता आसनार्थे विनियोगः
आसनं चापि देवेभ्यो ब्रह्मन्कर्म समारभेत् उत्पतन्ती
तु भूतानि पृथिव्यां नागवासिनः पृथ्वि त्वया धृता लो
का देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कु
रु चासनं अपसर्पन्तु ये भूता ये भूता भुवि संस्थिता
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॐ ह्रीं अ
नंतासनाय नमः आधारशक्तिकमलासनाय नमः

प्र॰च॰
सा॰
२८

हूंफडित्यासनमंत्रः जपस्यमात्रानियमस्त्वस्मिन्ने
वशास्त्रेउपरिवैल्लवाष्टात्तरीपटलेवक्ष्यते नातिद्रुतं
नातिविलंबितंचेति कल्पांतरेप्युक्तं उच्चैर्जपोधमः
प्रोक्तउपांशुर्मध्यमःस्मृतः उत्तमोमानसोदेवित्रिवि
धःकथ्यतेजपः अतिह्रस्वोव्याधिपीडा अतिदीर्घ
स्तपःक्षयः अक्षराक्षरसंधानः नैरंतर्यविधिः प्रोक्तो
नदिनंप्रतिलंघयेत् दिवसातिक्रमात्सोमंत्रसि
द्धिर्भवेन्नहि यावत्संख्यंजपेदह्नि पूर्वस्मिंस्तावदेव
हि दिनांतरेपिप्रजपेदन्यथासिद्धिरोधकृत् तत्रम
धुरत्रयेनमहेशोद्देशेनाज्यमिश्रितं देव्युद्देशेक्षीराज्यमि
लितंचेतिपत्तविशेषः तत्रविघ्नेशविषयेचेत्तदो
द्देशेनाज्यमिश्रितमेव शक्तिविषयेचेत्मायेणतदे
वत् तत्रहोमेऽशक्तश्चेत् जपसंख्यापेक्षयावेदसं
ख्यागणितोब्राह्मणैर्मंत्रोजप्तव्यः षट्संख्यागणि
तः क्षत्रियैर्जप्तव्यः अष्टसंख्यागणितोवैश्यैर्ज-
प्तव्यः होमेनसाकंचेत् पक्षत्रयाणामपिसमानैव
संख्या पुनर्वर्णत्रयाणांमध्येहोमराहित्येयोवर्णस्त
स्यविहितसंख्यातत्स्त्रीणांचतद्वर्णमाश्रितस्यपूर्व
स्यापिसंख्याविहितेतिसंप्रदायः तदुक्तंचक्रमदी
पिकायां अशक्तानांहोमेनिगमरसनागेंद्रगणितं।

तोजपःकार्यश्चेतिद्विजन्टपविशामाङ्कुरपरे सहोमा।
श्चेदेषांसमद्दृजपोहोमरहितोय उक्तोवर्णानांसव
र्ल्वविहितस्तच्चलटपेण यंवर्णमाश्रितोयःशूद्रःसच।
तस्मतभ्रुवांविहितं विदधीतविधिवदेतंश्रद्धावान्
भक्तिभावनस्वतन्त्रविति तत्राङ्कुरपरइति॰ द्विगुणाति
क्रमेणेतिशेषः तदुक्तं यद्यदंगंविहीयेततत्संख्याद्विगु
णोजपःकर्तव्यःस्वांगासिद्ध्यर्थंतदशक्तेनभक्तितः वि
प्राराधनमंत्रेणव्यंगसांगमवाप्नुयात्तइति तत्रश्चेत्तशू
द्रस्यापिमंत्रेऽधिकारोस्तीतिवर्णयंति तदुक्तंचक्रमदी
पिकायां द्विजनिसृवन्टपवैश्यपत्तुर्यजातानांस्तुतिवनवासि
गृहस्थवर्णिनांच जपहुतयजनादिभिर्मन्त्रतांफला।
तिह्लिकस्वनकस्यचित्कयंचित् सर्वेश्ववर्णेषुतपाश्रा।
मेषुनारीषुनानाह्वयजन्मभेदेषु दातापलानामभिवां
छितानांद्रागेवगोपालकमंत्रएषः स्वनमच्युतकदाप
पातनेकारणंभवतिभक्तिरंजसा तद्वतस्तष्टयफलामघ
ततोभक्तिमानधिकृतोहरेरोगुणादिति अथहोमार्थंकुं
डलक्षणविधिमस्मिन्नेवप्रपंचसारेप्राक्कृपंचमेदीक्षा।
पटलेउक्तेनप्रकारेणवक्ष्ये प्रागेवलक्षणयुतानिच।
मंडपेस्मिनकुंडानिकारयत्तसम्यगथोभदिशास्तु आ
खंडलार्कस्तनवारिथनाधिपानांदोर्मान्तकाणिविलस

द्गुणमेखलानि चतुरस्रमर्धशशिविंबविलसित
मध्यत्रिकोणकं पद्मदलरुचिरवृत्तमिति ब्रुवते बु-
धा विविधकुंडलक्षणं विंशाश्चतुराधिकाभिरं-
गुलीभिः सूत्रेणायामपरिसूत्र्य भूमिभागं नाभि
स्त्रयमेखलास्तत्र तावतीभिरेकोत्पन्नाचांगुलिमपि मे-
खलाश्चकार्याः सत्वपूर्वकगणान्विताः क्रमात्
द्वादशाष्टचतुरंगुलोच्छ्रिताः सर्वतोंगुलिचतुष्क
विस्तृता मेखलाः सकलसिद्धिदा मताः योनिस्त-
स्यास्त्रिमायामध्यदिशि चतुरस्रस्यलारब्धनाला
तन्मध्योल्लासिरंध्रोपरि परि वितता श्वत्थपत्रानुका-
रा उत्सेधायामकाभ्यां प्रकृति विकृति संख्यांगुला-
ष्टांगुलास्याद्विसृष्टा द्वादशार्धांगुलमितनमिता
ग्रा नितिविष्टेव कुंडे इति अस्यार्थः तन्त्रदीक्षाविधाने
तु चतुर्दिक्षु चतुर्विधं कुंडमुक्तं तेषां मध्ये चतुरस्रकुं-
डं तु सार्वकामिकं तेन तत्सर्वहोमसाधारणं तेन तदे-
व कुंडं कुर्वीत तदुक्तं तत्रैव दीक्षापटलकाले अथ
वा दिशि कुंडमन्तरस्यां प्रविदध्याच्चतुरस्रमेकमेव
गदितैरपिलक्षणैः समेतापरितने दृष्टिमनोहरं च-
कांस्येति तेन चतुरस्रकुंडलक्षणमेवात्र कथ्यते प्र-
थमं तावच्चतुर्विंशत्यंगुलप्रमाणमायामविस्तारेण

तावदंगुलिप्रमाणं निम्नेन च भूमिभागे सूत्रेण प
रिसूत्र्य निम्नीकृत्य पुनस्तस्मान्निम्नस्थलादेकांगु
लतो वहिः परितः सूत्रमास्फाल्य तद्वहिस्ततो द्वा
दशांगुलमानेन च परितः सूत्रमास्फाल्यात्रान
योरास्फालितसूत्रयोर्मध्ये चतुरंगुलविभागेन।
तिस्रो मेखलाः कार्याः इत्थं मेखलास्थानं प्रथमे
खलालक्षणमुच्यते दोःप्रमाणं दैर्घ्येण द्वादशां।
गुलोत्सेधेन चतुरंगुलविस्तारेण प्रथमां मेखलां
विरचय्य तस्या मेखलाया वहिः पार्श्वे अष्टांगुलो
त्सेधेन चतुरंगुलविस्तारेण द्वितीयां मेखलां त
द्वहिस्तत्पार्श्वे चतुरंगुलोत्सेधविस्तारेण तृती
यां मेखलां विरचय्य पुनस्तत्र कुंडस्य पश्चिममेख
लामध्यदेशे भूमौ प्रथममेखलामध्यदेशासंश्लि
ष्टं द्व्यंगुलायामविस्तारमेकांगुलोत्सेधं चतुरस्रं कृ
त्वा तस्य पूर्वदेशमारभ्य ऊर्ध्वक्रमेण दंडवदुन्नतः।
द्वितीयमेखलायां तं हस्ताकारेण नालं विरचय्य तत्र
मध्यमेखलायां परिस्तरणार्थं छिद्रं विधाय तस्मा
द्वितीयमेखलाग्रादारभ्य तृतीयमेखलाविस्तारस्य
प्राग्भागावधि अश्वत्थपत्राकारां योनिं चतुर्विंशा।
त्यंगुलप्रमाणां तृतीयमेखलातोऽप्यवमात्रमुन्नत

प्र० व०
सा०
३०

तांताम्रस्यपत्राकारांमध्यतोद्व्यंगुलविस्तारामग्रात् षडंगुलंततःपश्चिमभागादारभ्य उभाभ्यांपार्श्वाभ्यांक्रमेणसंकोचवर्ती मूलभागादग्रावधिक्रमेणकिंचिन्निम्नस्थलामग्रतोयवमात्रेणकिंचित्कुड्मलांतर्निविष्टामिवकुर्यात् तत्राम्रस्यपत्रस्यचतुर्विंशत्यंगुलप्रमाणत्वेनप्रथममेखलामारभ्यद्वितीयमेखलाग्रावधिखल्वनालंतदग्रादारभ्यखल्वपत्रारंभः तत्रैवद्वितीयमेखलांतः तृतीयमेखलोच्छ्रायश्चतुरंगुलःखल्वतेनतत्रैवपत्रस्यचतुरंगुलसंख्या जाता एतेनमेखलात्रयस्यविस्तारंप्रत्येकं चतुरंगुलप्रमाणंखल्वतत्रद्वादशांगुलप्रमाणंपत्रस्यजातंसंभूयषोडशांगुलप्रमाणंजातं पुनरष्टांगुलविस्तारंचसंभूयचतुर्विंशत्यंगुलप्रमाणमाम्रस्यपत्राकारायोनिः ॥ अथवाप्रथममेखलादारारभ्यद्वितीयमेखलाग्रावधिपत्रस्यनालंतदष्टांगुलप्रमाणंखल्वततआरभ्य तृतीयमेखलाग्रावधिचतुरंगुलप्रमाणं ततआरभ्यमेखलात्रयस्यविस्तारदेशंप्रत्येकंचतुरंगुलंसंभूयद्वादशांगुलसंख्याजाताएतानिसर्वाण्यंगुलानिसंभूयचतुर्विंशत्यंगुलानिजातानि एवंवाचतुर्विंशत्यंगु

लप्रमाणं अश्वत्थपत्राकारा योनिः तस्मादुक्तेन
प्रकारेण कुंडस्य गर्त्तायाम विस्तारोच्छ्राययोनीनां प्र
त्येकं चतुर्विंशत्यंगुलमानेन निर्माणं तेन सर्वं चतु
र्विंशतितत्वात्मकमिति संप्रदाय इति कर्तुर्दक्षिण
हस्तस्य मध्यमांगुलिपर्वणोः मध्यस्य दीर्घमानेन
मात्रांगुलिरितीरिता यवानामष्टभिः ज्ञेयमानां
गुलमुदीरितं इत्यं सर्वहोमसाधारणं कुंडलक्षण
मुक्तं ॥ तत्र मंत्रदेवताप्रकाशिकायां तु होमसंख्या
नुसारेण कुंडस्य हस्तपरिमाणविशेष उक्तः तत्प्रका
रो लिख्यते कोटिहोमे ऽष्टहस्तमर्धकोटिहोमे
सप्तहस्तं दशलक्षहोमे पंचहस्तं एकलक्षहोमे चतु
र्हस्तं अर्द्धलक्षे त्रिहस्तं अयुते द्विहस्तं सहस्र एकह
स्तं कुंडं कुर्यादिति केचित् अन्यत् क्रूरप्रयोगे दक्षि
णदिशि त्रिकोणं कुंडं कुर्यात् व्याधिमृत्युपरिहारा
र्थं पश्चिमदिशि वर्तुलं कुर्यात् उच्चाटनप्रयोगार्थं
वायुदिग्भागे षट्कोणं कुंडं कुर्यात् श्रीसमृद्ध्योत्त
रदिशि पद्माकारं कुर्यात् ज्ञानार्थमीशदिग्भागे ऽष्ट
कोणं कुर्यात् तत्रैकहस्तमानानुसारेण खलु पूर्वं
कुंडस्य गर्तमेखलादीनां चतुर्विंशत्यंगुलमानमु
क्तं तदपि हस्तमानाधिक्यानुसारेण वर्द्धनीयं ॥

प्र. व.
सा.
३१

अथ शारदातिलकोक्तप्रकारेण कुंडस्य हस्तमानमु
च्यते ॥ मुष्टिमात्रमितं कुंडं शतार्द्धे संप्रचक्षते शतहो
मेऽरत्निमात्रं वा बाहुमात्रं सहस्रके द्विहस्तमयुते लक्षे
चतुर्हस्तमुदीरितं दशलक्षे षड्ढस्तं कोट्यामष्टकरं
स्मृतं एकहस्तमितं कुंडमेकलक्षे विधीयते ल
क्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत् दशहस्तमि
तं कुंडं कोटिहोमेपि शस्यते सर्वसिद्धिकरं कुंडं चा
तुरस्रं समीरितं पुत्रप्रदं योनिकुंडमर्द्धचंद्राभं शुभप्र
दं शत्रुक्षयकरं त्र्यस्रं वर्तुलं शांतिकर्मणि छेदमा
रणयोः कुंडं षडस्रं पद्मसन्निभं वृष्टिदं रोगशमनं कुं
डमष्टास्रमीरितं विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुल
मिष्यते वैश्यानामर्द्धचंद्राभं शूद्राणां त्र्यस्रमीरितं
चतुरस्रं तु सर्वेषां केचिदिच्छंति तांत्रिकाः कुंडस्य रू
पं जानीयात्परमप्रकृतेर्वपुः प्राच्यां शिरः समाख्यातं
बाहू दक्षिणसौम्ययोः उदरं कुंडमित्युक्तं योनिः पा
दौ तु पश्चिमे नित्यनैमित्तिके होमे स्थंडिले वा समा
चरेत् हस्तमात्रेण तत्कुर्याद्वालुकाभिः सुशोभितं
अंगुलोत्सेधसंयुक्तं चतुरस्रं समंततः ॥ एवं कुंडल
क्षणान्युक्तानि ॥ अथ होमसामान्यविधिं विघ्नेशाक
ल्पोक्तप्रकारेणावक्ष्ये ॥ विविक्ते रुचिरे रम्ये स्वावासी

नःसमाहितः आत्मानमात्मनाध्यात्वाजपहोमा
दिकाःक्रियाः स्वगृह्योक्तविधानेन अग्निप्रज्वाल्य
देशिकः कुंडेवास्थंडिलेवापिब्राह्मणोऽथवास्वयं
औपासनेयदिस्वार्थमितरेषांतुलौकिकेइति ॥
एवककल्पे तत्रकृत्वाज्यभागांतेसर्वमङ्गलेत्विना
दिकं स्वगृह्योक्तविधानेन ततोहोमंसमाचरेदि
ति स्वगृह्योक्तेति आचार्यस्यकर्तुर्वाइतिविकल्पः
यत्वंतरविधानेउक्तं अग्निमुखादिकमखिलंस्व
चरणविहितक्रमेणकृत्वाग्नौ आवाह्यवैद्यनाथं
परिवारयुतंप्रपूज्यगंधाद्यैरिति अस्मिन्नेवशास्त्रे
प्राक्कृदीक्षापटलेउक्तं तत्राद्योसद्दृतमतीमतीद्वि
याभ्यां समस्तात्सकलजगन्मयीचशक्तिं तयोर्नो
मणिभवमारणेयकंवातारेणदीपतुरहोत्थ
मेववाग्निं पिंगलहनहनदहदहपचपचसर्व
ज्ञापयस्वाहा अनेनानलंज्वालयेत् अग्निंप्रज्व
लितंवंदेजातवेदंहुताशनं सुवर्णवर्णममलं।
समिद्धंसर्वतोमुखं अनेनज्वालितंमंत्रेणोपति
ष्ठेद्हुताशनं ततःप्रविन्यसेद्देहे जिह्वामंत्रैर्वि
भावसोः सलिंगगुदमूर्द्धास्यनासानेत्रेषुचक्र
मात् सर्वांगेषुचजिह्वाश्चवद्व्यते त्रिविधाग्नि

प्र॰ च॰
सा॰
३२

काः हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा ब
हुरूपा तिरक्ता च जिह्वाः सप्तेति सात्त्विकाः पद्मरागा
सुवर्णा च तृतीया भद्रलोहिता। लोहिताख्या तथा
श्वेता धूमिनी सकरालिका राजस्यः कथिता जिह्वाः
क्रमात्कल्याणरेतसः विश्वमूर्तिस्फुलिंगिन्यौ धूम्र
वर्णा मनोजवा लोहिता च करालाख्या कालीता
मस्यजिह्विकाः अनलेराद्यविंदुताः सादियांता ल
रान्विताः सात्त्विका दिव्यपूजासु राजसाः काम्यक
र्मसु तामसाः क्रूरकार्येषु प्रयोक्तव्या विपश्चिता
सुराः सपितृगंधर्वा यक्षा नागाः पिशाचकाः रा
क्षसाश्च क्रमादेतेनलेराश्रिता रसनाः स्वमी जिह्वासु
त्रिदशादीनां तत्तत्कार्यसमाप्तये जुहुयाद्वांछितां
सिद्धिं दद्युस्ता देवता मताः स्वनामसदृशाकाराः
प्रायो जिह्वाह्वविर्भुजः तत्रानलेराद्यीत्यादे रयम
र्थः अनल इति रेफः इर इति यकारः आद्यीति ऊका
रः षष्ठस्वरः विंदुरिति अनुस्वारः प्रतिलोमेन सका
रादियांतैर्वर्णैर्योजयेत् एतदुक्तं भवति सकार रे
फयकार षष्ठस्वरविंदुरूनां कूटः स्यात् ॥ इति प्रथमसप्ता
दिष्वेवमेव योजयेत् एवं सप्तजिह्वामंत्रादौ योज
येत्। अथ श्रीविद्याकल्पसूत्रोक्तप्रकारेणाभि

ग्निजननविधिर्लिख्यते अथस्वेष्टमंत्रस्यहोमविधा
नंव्याख्यास्यामः चतुरस्रंकुंडमथवाहस्तायाममंगु
ष्ठोन्नतंस्थंडिलंवाकृत्वासामान्यार्घ्यजलपशोध्यसा।
मान्यार्घ्योपशोधनंनामशंखपूरणविधिः तेनापो
ह्यप्राचीमुदीचीस्त्रिस्त्रिर्लिखेद्रेखालिखित्वा तास्रे
खासुब्रह्मयमसोमरुद्रविष्णुवीन्द्रान् षट्तान्न
मः संपूजितानभ्यर्च्य षट्तान्नमः संपूजितानिति
ऐं ह्रीं श्रीं ऐं क्लीं सौः ब्रह्मणेनमः एवंयमादिष्वपि
योजनीयं सहस्रार्चिषेहृदयायनमः स्वस्तिपूर्णा
यशिरसेस्वाहा उत्तिष्ठपुरुषायशिखायैवषट् धू
मव्यापिनेकवचायहुं सप्तजिह्वायनेत्रत्रयाय।
वौषट् धनुर्धरायास्त्रायफट् इतिस्वदेहेषडंगं
विधाय अग्निमंत्रस्य भृगुऋषिर्गायत्रीछंद :
हुताशनोदेवता इतिऋष्यादिकंविन्यस्य अने
नैवषडंगेनकुंडमभ्यर्च्य तत्राष्टकोणं षट्कोणं त्रि
कोणात्मकमग्निचक्रमंतर्वर्तः क्रमेणविलिख्य
पीतायैश्वेतायै अरुणायै कृष्णायै धूम्रायै तीव्रायै
स्फुलिंगिन्यै रुचिरायै ज्वालिन्यैनम इतित्रिकोण
मध्ये वह्नेःपीठशक्तीःसंपूज्य अंनमसेरंवजमसेसंस
त्वाय आत्मनेअंतरात्मने ज्ञानात्मनेपरमात्मने

नम इतितत्रैवाभ्यर्च्यजनिष्यमाणस्यवह्नेः पितरौ
वागीश्वरीवागीश्वरौपीठेसमभ्यर्च्यतयोर्मिथुनीभा
वंध्यात्वा॰ ह्रूंवागीश्वरीवागीश्वराभ्यांनमइतिध्या
त्वाअरणेः सूर्यकांतात् द्विजगृहाद्वावह्निमुत्पाद्य
मृत्पात्रेताम्रपात्रेवा आग्नेय्यामीशान्यांनैर्ऋत्यांवा
निधायाग्निशकलंक्रव्यादांशंनैर्ऋत्येविसार्यनिरी
क्षणप्रोक्षणताडनावगुंठनादिभिरग्निं विशोध्य
निरीक्षणादिकंनामहृदयमंत्रेणनिरीक्षणंशि
रोमंत्रेणप्रोक्षणं॰ अस्त्रमंत्रेणताडनं॰ कवचमंत्रे
णावगुंठनमितिच विशोध्य ॐवैश्वानरजातवेद
इहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहेति
मूलाधारोत्थितंसंविद्वह्निंललाटनेत्रद्वारानिर्ग
मय्य तेवाह्यावह्निंयुक्तंपातयेत् ततोस्त्रेणसंरक्ष्यसं
पूज्यहौं॰ वौषडितिमंत्रेणधेनुमुद्रयाअमृतीकृ
त्यादायकुंडस्योपरिप्रदक्षिणंत्रिःपरिभ्राम्यवागी
श्वरीबीजायनमः वागीश्वरबीजमिदंध्यात्वावा
गीश्वरीगर्भनाड्यांवागीश्वरेणक्षिप्तंविभाव्यकुं
डेग्निंधायनाभिदेशेतिसमूह्यपरिधानस्यसंस्थ
तिंविभाव्यशौचाचमनार्थंतोयबिंदुंहृदयमंत्रेण
दत्वा अग्निंप्रज्वलितंवंदेजातवेदंहुताशनं सु

वर्णवर्णमनलंसमिद्धं विश्वतोमुखं इत्युपस्थापयक
वचमंत्रेण इंधनैराज्याद्य ॐ त्रिष्टुकृष्णहरितपिंगल
लोहितानल सर्वकर्माणि साधय स्वाहेति वह्निमुपस्था
प्य चित्पिंगल हन हन दह दह पच पच सर्वज्ञाज्ञापय
स्वाहेति · प्रज्वाल्य वागीश्वरीगर्भे धृतं ध्यात्वा गर्भाग्न
येनम इति गर्भस्याग्निसंपूज्य गर्भरक्षार्थमस्त्रमं
त्रेण सप्तदर्भकंकणं देव्या हस्ते बध्वा गर्भाधानपुंसव
नसीमंतोन्नयनजननजातकर्मनामकरणान्नप्रा
शनचौलोपनयनव्रतसमावर्त्तनविवाहकर्माणि
षट्तारनमोंतमंत्रेण कुर्यात् तद्विशेषो लिख्यते ॥
ऐं ह्रीं श्रीं ऐं क्लीं सौः नम इत्यभ्यर्च्य हृदयमंत्रेणाहुति
त्रयं तिलैः कुर्यादिति गर्भाधानं विधाय पुंसवनार्थं तृ
तीये मासि षट्तारैरभ्यर्च्य शिरोमंत्रेणाहुतित्रयं तिलैर्द
त्वा सीमंतोन्नयननिमित्तं षष्ठे मासि षट् तारैरभ्यर्च्य शि
खामंत्रेणाहुतित्रयं तिलैर्दत्वा जननार्थं दशमे मासि
षट्तारैरभ्यर्च्य कवचमंत्रेणाहुतित्रयं तिलैर्दत्वा जात
स्य गर्भमलापहरणार्थं वह्निं दर्भाग्रैः षट्तारमंत्रेण
संपूज्य देवीहस्तस्य दर्भकंकणमुन्मुच्य स्वर्णबंधना
दीन् देव्याः कृतमिति ध्यात्वास्त्रदयमंत्रेणाभ्यर्च्य सद्यः
स्नातक निहृतये कुंडमस्त्रमंत्रं जप्त्वांभसा संसिच्याद ।

प्र॰ च॰ र्भेणाऽस्त्रमंत्रेणताडनं कृत्वा वह्निरक्षार्थं पूर्वादिमे
स्ना॰ खलास्तरणपूर्वाग्रदर्भेणास्तीर्य तेषु परिधिविष्टरा
३४ न्संस्थाप्य वक्राणेन लालापनोदायाग्नेः पूर्वे च मे
34 लाग्रयोश्चूतसिक्तपालाशाः पंचसमिधः अस्त्रमंत्रे
णकृत्वा परिधिषु ब्रह्मणे नमः विष्णवे नमः रुद्राय न॰
मः ईश्वराय नमः इति षट्तारनमःसंपुटितान् पू
र्वादिपरिधिस्थान संपूज्य विष्टरेषु पूर्वादीशानांतानिं
द्रादीनभ्यर्च्यार्घ्याद्युपचारान् दत्वेति विघ्नसंघातं निवा
र्यतः स्रुक्स्रुवौ याज्ञियवृक्षकृतौ नामस्रुक्कृतौ वास
कुशाग्रस्थूलवदना वयोस्रुवो गृहीत्वा तत्रज्यक्का ऊर्ध्वव
दनत्वं स्रुवस्याऽधोवदनत्वं चेत्यर्थः अस्त्रमंत्रेण संप्रो
क्ष्य कवचमंत्रेणावगुंठ्याग्नौ प्रताप्य परिभ्राम्य कुशा
ग्रेण तदग्रं संमृज्य पुनः परिभ्राम्य मध्येन मध्यं संमृ
ज्य पुनः परिभ्राम्य मूलेन मूलं संमृज्य प्रताप्य पुनः प
रिभ्राम्य तयोः कुशसंमार्जितप्रदेशे स्रुग्ग्रे शिवतत्वा
य नमः मध्ये विद्यातत्वाय नमः मूले आत्मतत्वाय नमः
इति तद्दर्भेण विन्यस्य शक्तिरूपां स्रुचं पुरुषात्मकं स्रुवं
भावयित्वा तद्ग्रीवायां कवचमंत्रेण त्रिसूत्रेण वेष्ट्यात्म
नः सव्यभागे कुशोपरि संस्थाप्य तद्दर्भान् गंधोपलिप्य स्रु
क्स्रुवौ हृदयमंत्रेण पूजयेत् अथ गव्यमाज्यं दारुपात्रे

द्भस्त्यात्रेतान्नपात्रेवादायवीक्षणप्रोक्षणताडना।
वगुंठनैः प्रागुक्तमंत्रैर्विशोध्यस्वदेहेब्रह्माणमयंवि।
चिंत्याज्यमादायकुंडस्योर्ध्वंत्रिधाहुत्वआग्नेय्याम
धिश्रित्यकुशाग्रेणघृतविंदुमादाय ॐ ह्रां ब्रह्मणे
स्वाहेतिहुत्वापुनर्विष्णुमयंस्वदेहेविचिंत्यआज्य
मादायपैशान्यामधिश्रित्यकुशाग्रेणाज्यविंदुमा
दाय· ॐ ह्रीं विष्णवेस्वाहेतिहुत्वापश्चात्स्वदेहेरुद्र।
मयंध्यात्वा नाभिस्थानेधिश्रित्य ॐ हूं रुद्रायस्वाहे।
तिआज्यविंदुंकुशाग्रेण जुहुयात् उदग्गृहीत्वाकुं
डनाभौसंस्थाप्यअग्रेष्विदुकपवित्रेणास्त्रमंत्रेणोत्तृ
षग्रेष्विग्नन्यग्नौक्षिपेत् हृदयमंत्रेणदग्धद
र्भोल्मुकमस्त्रमंत्रेणाहुतेप्रदश्यास्त्रमंत्रेणाग्नौक्षि
पेत् दीप्तेनान्येनदर्भेणकवचमंत्रेणनीराजनाऽग्नौ
क्षिपेत् ततःप्रादेशमात्रंमध्यग्रंथिकुशद्वयंप्राण
वेनघृतमध्येन्यस्यादक्षिणवामक्रमेणाशुक्लपक्ष
कृष्णपक्षद्वयंविभाव्यपुनर्दक्षिणवाममध्यभा
गेषुपिंगलेडासुषुम्नानाडीत्रयंचसंविभाव्यस।
क्षभागात् स्रुवेणाज्यमादाय ॐ ह्रां अग्नयेस्वाहे
त्यग्नि दक्षिणनेत्रेहुत्वावामभागादाज्यमादाय
ॐ ह्रां सोमायस्वाहेतिवामनेत्रेहुत्वामध्यादाज्य

प्र॰च॰ मादाय ॐ ह्रां अग्नीषोमाभ्यां स्वाहेत्यग्निमध्यनेत्रे
मा॰ हुत्वा ॐ ह्रां अग्नये स्विष्टकृते स्वाहेति अग्निवक्त्रेच
३५ स्वेति किं विहुत्वा शेषमाज्यं तद्धदाज्यस्थाल्यां हेति
35 प्रक्षिपेत् कृष्णपक्षेप्येवमाहुतिः शुक्लपक्षे तु ॐ
ह्रां सोमाय स्वाहा॰ ॐ ह्रां अग्नये स्वाहा ॐ ह्रां सोमा
ग्नीभ्यां स्वाहा अग्नये स्विष्टकृते स्वाहेति वामदक्षि
णमध्यनेत्रेषु च वक्त्रे च हुत्वा आज्यस्थालीवेदादि-
ताभिमंत्र्य अस्त्रमंत्रेण संरक्ष्य कवचमंत्रेणावगुं-
ठ्य ततन्मूलमंत्रेण धेनुमुद्रयामृतीकृत्य मूल
मंत्रेण संपूज्याऽसंस्कृताज्यं संस्कृताज्यं किंचिद्धि
स्रज्य शोधयेत्। अथ नामकरणार्थं षट्तो वैरभ्य
र्च्याऽस्त्रमंत्रेण तिलैराहुतित्रयं दत्वाऽन्नप्राशनम
प्येवं चौलोपनयनव्रतसमावर्तनविवाहकर्म-
णां षट्तो वैः पृथक् पृथगभ्यर्च्य षट्तार पूर्ववंके
स्ततन्मूलमंत्रैः पृथक् तिलैः समाहुतीर्जुहुया
त् एवं गर्भाधानादि द्वादशसंस्कारैरग्निमुपच
र्य हृदयमंत्रेण वागीश्वरावभ्यर्च्य विसृज्य त्रिण
यनमरुणमावहमौलिमम्बुजाक्षं श्रुकमरुणम
नेकाकल्पमम्भोजसंस्थां अभिमतवरशक्ति-
स्वस्तिकाभीतिहस्तं नमत कनकमालालंकृ

तांसंकृशानुंइतिध्यात्वापूर्वोक्ताग्निचक्राष्टकोणेजा
तवेदसेसप्तजिह्वाय हव्यवाहनायअश्वोदरजायवैश्वा
नरायकौमारतेजसेविश्वमुखायदेवमुखायनमस्
त्वभ्यर्च्यषट्कोणेपूर्वोक्ताग्निषडंगमभ्यर्च्यत्रिकोणे
अग्निंपूजयित्वाउत्तिष्ठपुरुषहरिपिंगललोहिताक्ष
देहिमेददापयस्वाहा इत्यनेनाग्निमंत्रेण अग्निंसंपू
ज्यहिरण्यायैकनकायैरक्तायैकृष्णायैसुप्रभायैअति
रक्तायैबहुरूपायैनमः इत्यग्नेःसप्तजिह्वामंत्रेणाज्येन
पृथक् सप्ताहुतीर्जुहुयात् गर्भाधानादिसंस्कारपूर
णार्थंवौषडंताग्निमूलमंत्रेणपूर्णाहुतिंकुर्यात् ॥
तद्यथा सर्पिषास्रुचमापूर्यपुष्करोपर्यधोमुखं स्रुवं
निधायपुष्करोपरिस्रुचउपरिइत्यर्थः तदग्रेपुष्पमारो
प्यवामदक्षिणहस्ताभ्यांशंखवत्सक्ताभ्यांपुरस्सव्येन
लग्नौतावुभौस्रुक्स्रुवावादायसमपादःसमुत्थाय
ऊर्ध्वकायोनाभ्यांतिर्यग्विधायसुगद्गदन्नदक्षिःवौषडं
तमूलमुच्चरन् वामस्तनांतंस्रुचमानीययवप्रमाण
धारयासम्यक्समाज्यंवह्नौक्षिपेदितिपूर्णाहुतिः वैश्वान
रोत्तिष्ठचित्पिंगलहनहनदहदहपचपचसर्वज्ञाज्ञाप
यस्वाहेतिआहुतित्रयंविधायबहुरूपायांजिह्वाया
मिष्टदेवतामावाह्यावरणैःसहसमर्चयेत् ॥ अथा

ग्निसाध्यदेवतयोरैक्यभावनाप्रकारः अग्नेस्त्वैमेस्म
रेतेजः पावनं परमं यतः तस्मात्वदीयहृत्पद्मे संस्था
प्यात्मं पूजयाम्यहं इत्यग्निं संप्रार्थ्य अग्नेर्विग्रहमध्य।
नाड्यां स्वयं प्रविश्य तदीयहृत्पद्मे स्वेष्टां देवतामावा
ह्य तत्र भास्वरं देवं सावरणमभ्यर्च्य तन्मूलमंत्रस्व
भार्थ्य वह्निस्थ देवतानामाविर्निर्गतो ज्योतीरूपशि
वामग्नेर्लीनावप्यग्निमात्रवियोगेनाविछिन्नास्वभय
रुक्तास्पदामेकैनैवात्मनाध्यायेत् एवं कुंडयागा
ग्न्यात्मनामैक्यं भावयेत् एवमग्निजननं कृत्वा अस्मि
न्नग्नौ पीठावरणार्चनादि पूर्वकं होमं कुर्यात् ॥
अथ महालक्ष्मीरत्नकोशोक्तहोमसामान्यविधि
र्लिख्यते कुंडस्य मध्यमे भागे कृतमहावर्ते ते पुनः अ
ग्निरूपमहं वक्ष्ये सिद्ध्यर्थं सर्वकर्मणां यतो यस्मिन्न।
विज्ञाते होमो भवति निष्फलः हिरण्या कनका रक्ता
कृष्णा चैव ततः सुप्रभा अतिरक्ता बहुरूपा जिह्वाः स
प्तप्रकीर्तिताः हिरण्या वारुणे जिह्वा वायव्ये कनका
तथा रक्ता चोत्तरजिह्वा तु कृष्णा याम्यदिशि स्थिता
सुप्रभा पूर्वजिह्वा स्यादतिरक्तानले स्थिता बहुरूपा
तु नैरृत्यां जिह्वा स्यात् प्रकीर्तिताः जिह्वाभेदं वदंत्ये
वं सर्वदैवविधानतः कुंडस्य पूर्वदिग्भागे काली

जिह्वाप्रकीर्तिता आग्नेय्यांतुकरालीस्याद्दक्षिणे
तुमनोजवागम्भलोहिताचनैरृत्येधूम्रवर्णातु
वारुणे स्फुलिंगिनीतुवायव्येसौम्येविश्वरुचिः
स्मृता कालींकरालींजिह्वायांशान्तिकंपौष्टि
कंभवेत् मनोजवायांजिह्वायामभिचारोविधी
यते भूतप्रेतपिशाचादिशांतिर्लोहितजिह्वके
जुहुयात् धूम्रवर्णायांद्दृष्टिकामोविधीयते स्फु
लिंगिन्यांतुजिह्वायांतस्यामुच्चाटनेविज्ञः यातु
विश्वरुचिर्जिह्वाकुंडस्योत्तरभागतः सर्वार्थसा
धिनीजिह्वालक्ष्मीस्तत्रप्रतिष्ठिता एवंध्यात्वातु
जुहुयात्तत्कार्यानुरूपतः अथतंत्रसमुच्चयोक्त
प्रकारेणाग्निहोमसामान्यविधिर्मूलग्रंथैर्विना केव
लमर्थतोलिख्यते प्रथमंतावदाज्यभागांतंकृत्वा
ध्यात्वाग्नेववागंधपुष्पाभ्यामभ्यर्च्यतमभितः
परिस्तरणपूर्वकंकृत्वापीठपूजावाहनावरणपू
जातिवेद्यपर्यंतांकृत्वातिवेद्यस्यानेहोमंसमाच
रेत् प्रथमंप्रणवव्याहृतिपूर्वकंपीठमंत्रैःसकृत् ।
सकृत् आज्याहुतिंकृत्वाआवाहनस्यानेमूलेन ।
चतुर्वारमाज्यंहुत्वा अकारउकारमकारैर्बिंदुनंते
स्त्रिभिर्हुत्वाप्रणवेनचहुत्वाजितंतेत्यादितत्त्वरूप

प्र॰च॰ सा॰ ३७ चारमंत्रैर्हुत्वा ततस्तन्मूलेन चतुर्वारं हुत्वा षडं
गमंत्रैर्हुत्वा ततस्तन्मंत्रवर्णैर्हुत्वा किरीटादिभिर्भू
षणैश्च जटादिभिर्वा ततस्ततो ऽस्त्रायुधैश्च हुत्वा उ
तरंगान्यावरणैर्निर्माल्यधार्यवसानैश्च हुत्वा आ
ज्येन चतुर्गृहीतं पूर्वकमन्यायं पूर्णाहुतिं मूल
मंत्रेणवौषडंतेन हुत्वा ततस्ततो ऽन्न द्रव्यहोमं स
मारभेत् तत्रापि द्रव्यांतरारंभे च पूर्णाहुतिं कुर्या
त् पुनर्होमावसाने मूलेन चतुर्वारं प्रसन्नपू
जार्थमाज्यं हुत्वा वक्ष्यमाणब्रह्मार्पणाद्याज्यं हु
त्वा व्याहृतिप्रणवेन च हुत्वा संस्रावं हुत्वा होमं
समापयेत् पुनरग्नेः प्रसन्नपूजनं कृत्वा अग्न्या
लंकरणादिकं कृत्वा साध्यमाहूयते नाग्निसमर्च
नादिकं कारयित्वा तस्य मूर्ध्नि मूलमंत्रं जप्त्वा तस्मा
द्दक्षिणां गृहीत्वा अग्निं विसर्जयेत् अथ होमद्रव्य
परिमाणं शारदातिलकोक्तप्रकारेण लिख्यते
अथाज्यहोमद्रव्याणां प्रमाणं तु विधीयते कर्षमा
त्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं कर्षं षोडशमा
षपरिमितं तद्द्विगुणा शुक्तिः उक्तानि पंचगव्यानि
तत्समानि मनीषिभिः तत्समं मधु दुग्धान्नमक्षमा
त्रमुदाहृतं अक्षमात्रं कर्षद्वयमात्रं दधिप्रसृति

मात्रं स्याल्लाजाः स्युर्मुष्टिसंमिताः पलद्वयं प्रसृति ः
श्चुकाल्लत्प्रमाणाः स्युः सक्तवोपि तथोदिताः गुडं
पलार्द्धमात्रं स्याच्छर्करापि तथा स्मृता ग्रासार्द्धं च
रुमात्रं स्यादिक्षुः पर्वावधिः स्मृतः एकैकं पत्रपुष्पा
णि तथा रूपाणि कल्पयेत् कदलीफलनारंगफला
न्येकैकशो विदुः मातुलिंगं चतुः खंडं पनसं दशधा
कृतं अष्टधा नालिकेराणि खंडितानि विदुर्बुधाः
त्रिधा कृतं फलं वैल्वं कपित्थं खंडितं द्विधा उर्वारु
कफलं होमे चोदितं खंडितं त्रिधा फलान्यन्यानि
खंडानि समिधः स्युर्दशांगुलाः दूर्वात्रयं समुद्दिष्टं
गडूची चतुरंगुला व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाष
यवाश्चापि तंडुलाः स्युस्तदर्धांशाः कोद्रवा मुष्टिसंमि
ताः गोधूमा रक्तकलमा विहिता मुष्टिमानतः ति
लाश्चुलुकमात्राः स्युः सर्षपास्तत्प्रमाणकाः शुक्ति
प्रमाणं लवणं मरीचान्यपि विंशतिः पुरं वदरमा
त्रं स्याद्रामठं तत्समं विदुः चंदनागुरुकर्पूरकस्तू
रीकुंकुमानि च तिंतिणीवीजमानानि समुद्दिष्टा
नि देशिकैः वैश्वानरं स्थितं ध्यायेत्समिद्धोमे तु दे
शिकः प्राणायाममाज्यहोमे तु निषण्णं शेषवस्तुषु
आस्यांतर्जिह्वया दद्याद्धविः पश्चात्सर्वकर्मसु कंठ

होमेभवेद्व्याधिर्नेत्रेचैवतथामहदीरितं नासिकाग्रोम
नःपीडामस्तकेथनसंज्ञयः काष्ठाग्निकर्णेधूम
स्तुनासिकांगारकाह्वशः भस्मम्रूर्ध्नोमग्नौवैज्वा
लाविज्ञेयायत्रतत्रच स्वर्णसिंहूरबालार्ककुंकु
मक्षौद्रसन्निभाः स्ववर्णरेतसोवर्णाःशोभनाः
परिकीर्तिताः भेरीवारिदहस्तीन्द्रध्वनिर्वह्नेःशु
भावहः नागचंपकपुंनागपाटलीयूथिकानि
भः पद्मेन्दीवरकह्लारसर्पिर्गुग्गुलसन्निभः ॥
पावकस्यशुभोगंधः शस्तकंतंत्रवेदिभिः प्रदक्षि
णास्यक्रकंपाःछत्राभाः शिखिनःशिवाः स्वशु
भायजमानस्यराष्ट्रस्यापिविशेषतः कुंदेंदुयवा
लोधूमोवह्नेःप्रोक्तःशुभावहः ह्रस्वाःकृशलगानेव
र्णेयजमानविनाशयेत् श्वेतोराष्ट्रंनिहन्त्याशु
वायसस्वरसन्निभः खरस्वासमोवह्नेर्ध्वनिःस
र्वविनाशकृत् पूतिगंधोज्रुतिभ्यजोहोतारुः
स्वप्रदोभवेत् किंनष्टानाशिवाकुर्यान्सर्वतथ
नपरिल्लयं शुकपिच्छनिभोधूमःपारावतसम
प्रभः हानिंतुरंगजातीनांगवांचकुरुतेचित्
एवंविधेषुदोषेषुप्रायश्चित्तानिदेशिकः मूलेना
स्त्रेणजुहुयात्पंचविंशतिमाहुतीः अथश्रसा

मातृकास्वरस्वरूपाः पूजार्थं यंत्रं वक्ष्ये सर्वाश्च देवता
यंत्रे विलसंपूज्याः तदुक्तं रामकल्पे यंत्रं मंत्रमयं प्रो
क्तं मंत्रात्मा देवतेरिता पुरा भगवता प्रोक्तं तंत्रे संमोहना
ह्वये देहात्मनोर्यथा भेदो मंत्रदेवतयोस्तथा तस्मा
त्पीठे महायंत्रं लिखित्वा तत्र पूजयेत् विना यंत्रेण चे
त्पूजा देवता न प्रसीदति क्रमदीपिकायामप्येवमे
वोक्तं शालग्रामे मणौ यंत्रे स्थंडिले प्रतिमासु वा नित्यं
पूजा हरेः कार्या न तु केवलभूतले इति तस्मात् यंत्र
प्रकारो लिख्यते व्योमाविःसचतुर्दशस्वरविसर्गाण
स्फुरत्कर्णिकं किंजल्कालिखितस्वरं प्रतिदलप्रार
ब्धवर्गाष्टकं दमाविंवेन च सप्तमार्णवभूजाश्चाशा
नु संवेष्टितं वर्णाब्जं शिरसि स्थितं विषगदप्रध्वंसि मृ
त्युंजयं अस्यार्थः प्रथमम् अष्टदलं पद्मं विलिख्य त
त्मध्ये कर्णिकायां हकारसकारचतुर्दशस्वराख्यश्री
कारविसर्गाणां कूटं ह्सौः इत्येतद् विलिख्य तन्मध्ये सा
ध्यनाम यंत्रन्यायादीन् उपरि त्रिंशत्पटले ध्रुवकमंत्र
विधाने प्रसंगाद्वक्ष्यमाणेन क्रमेण विलिख्य पुनरेत
स्मात्कर्णिकाद्वृतात् बहिरष्टसु दिक्षु एकैकस्यां दि
शि तिर्यक्रेखाद्वंद्वंद्वस्वरेखारूपेण विलिखेत् एवं
विलिखिते षोडशरेखासंख्या भवति तत्र द्वयोर्द्वयो

प्र.च.
मा.
३८

रेखयोस्तिर्यग्रूपेण विलिखितयो रंतराले किंजल्क
केसरादिसंज्ञं भवति सर्वयंत्रेपि केसरस्थानमिद
मेव तत्रचतुर्दलपद्मेपि षोडशादिदलपद्मेऽपि
अष्टदलपद्मोक्तरीत्या तत्तद्दलसंख्यानुगुणेन
केसरस्थानसंख्यापिवर्द्धनीया इत्येव विशेषः
एवं किंजल्कस्थाने संपाद्यते अष्टसु किंजल्कस्था
नेषु षोडशस्वरवर्णान् सबिंदुकानेकैकस्मिंस्थाने
द्वौद्वौ लिखेत् एवं सर्वत्रकेसरस्थाने स्वरान्तरलेख
नविषयेन्यायः पुनरष्टसु दलेषु क्रमेण कवर्गंप्रा
ग्दले विलिख्य तदनंतरदलमारभ्य क्रमेण चव
र्गटवर्गतवर्गपवर्गयादिचतुष्टयशादिचतुष्टयं
लादिद्वयं च एतानि सबिंदुकान्यालिखेत् सर्वयंत्र
विषयेपि दलेषु वा केसरेषु वा कादिवर्गान्तरलेख
नविधौ सबिंदूनेव वर्णान् विलिखेत् यत्रयत्रकेस
रे कादिवर्गलेखनीया भवंति तत्र सर्वत्र प्रायेण
यथास्थानं विभज्याक्षराणि विलिखेत् अवशिष्टा
क्षराणि मालिखेत् उपरिवक्ष्यमाणरीत्या यंत्रेऽव
शिष्टाक्षराणि च विलिखेत् एवं सर्वत्र यंत्रन्यायः
पुनरस्मिन्नेव प्रकृते मातृकायंत्रे यत्त्विशेषोस्ति
तत्र षष्ठसप्तमयोर्दलयोर्यादिपंचकं षादिपंचकं

वालिखेत् तत्रतु यत्र यत्र चतुरस्रलेखनविधिस्त
त्र सर्वत्रान्यत्रापि सम्पूर्णमेव चतुरस्रं विलिखे
त् एवमत्र चतुरस्रं विलिख्य तस्य पूर्वादिदिक्
चतुष्टये वमिति आग्नेयादिकोणचतुष्टये ठ
मिति उभावप्येवं सविन्दुकौ विलिखेत् एवम
न्तरं रूपमेव तु जंसाध्य शिवसिरस्थितमनुक्तफल
दं स्यादिति अस्मिन् यंत्रे पीठार्चनं कुर्यात् ॥
अथ सकलदेवतासमर्चनसाधारणपीठपूजा
विधानमुच्यते गं गुरुभ्यो नमः गं गणपतये न
मः इति पीठस्य दक्षिणवामयोः समभ्यर्च्य आ
धारशक्त्यै मूलप्रकृत्यै आदिकूर्माय अनंताय पृ
थिव्यै क्षीरसमुद्राय श्वेतद्वीपाय रत्नमंडपाय
कल्पवृक्षाय श्वेतछत्राय नमः सितचामराभ्यां
रत्नसिंहासनाय इत्येतैराधारशक्त्यादिभिरत्न
सिंहासनान्तैर्मन्त्रैः नमोन्तैः सर्वाधःस्तादारभ्य
उपर्युपरिक्रमेण पीठमध्ये समर्चयेत् तत्रैवेन्द्र
पीठविषये चेत् क्षीरसमुद्रस्थाने इक्षुसमुद्रा
येति योजयेत् शैवादिविषये तदुभयमपिना
स्ति पुनरपि केवलवैष्णवविषये श्वेतद्वीपाये
ति· तत्राप्यैश्वर्यप्रधानविषये रत्नद्वीपायेति यो

प्र·च·
मा·
८·

जयेत् शैवादिविषये कैलासगिरयेइतियोज।
येत् पुनरपिकेवलशैवादौकल्पवृक्षादयश्च।
नसंति तत्राध्यैश्वर्यप्रधानविषयेचेयथायो
ग्यंयोजनीयं इतरत्सर्वदेवतापीठार्च्चनेपित।
ल्पमेव पुनः धर्मायनमः ज्ञानायनमः वैरा।
ग्यायनमः ऐश्वर्यायनमः एतान्पीठपाद
रूपान्पीठस्याग्नेयकोदिणेषुसमर्चयेत्
तत्रकल्पांतरमते धर्मकंदायज्ञाननालाय
वैराग्यकर्णिकायैऐश्वर्यदलेभ्योनमइति
अस्मिन्मतेउपर्युपरिकंदादीन्यथोचितस्था
नेषुसमर्चयेत् पुनः। अधर्माय अज्ञानाय अ
वैराग्याय अनैश्वर्यायएतान्पीठस्यफलक
रूपान्प्रागादिदिक्षुसमर्चयेत् संसत्त्वाय
रंरजसेतंतमसेमांमायायैविंविद्यायैअंअनं
तायरंपद्माय अंसूर्यमंडलाय उंसोममंड
लायमंवह्निमंडलायअंआत्मने·उंअंतरात्म
ने·पंपरमात्मने· ॐह्रींज्ञानात्मनेनमः संसत्वा
येत्याद्यैर्ज्ञानात्मनेइत्यंतैः आवरणरूपैर्मंत्रैः
पीठमध्येसमर्चयेत् तत्रैवसर्वपूजायामनंतः
पुनर्मध्येअष्टदलंपद्मंविचिंत्यप्रागादिदले।

ष्ठकर्णिकायांच नवशक्तयश्च आसनमंत्रदे
वताश्च समर्चनीयाः क्वचित्क्वचिदासनमंत्रो ना
स्ति तत्र सर्वत्र केवलपद्मे समर्चयेत् इतरपीठमं
त्राः सर्वत्र समाना एव अयमेव सर्वदेवताविष
ये पीठार्चनन्यायः तत्र तु नवशक्त्यासनमंत्राण्य
मेव सर्वत्र विशेषः इतरत्सर्वं सकलदेवतापूजा
विषयेपि तुल्यमेव तत्र तु वैष्णवपीठे समर्चयेदि
त्युक्ते तन्नवशक्त्यासनमंत्रा एव विवक्षिताः तथा
दौर्गे वैनायके सौरादौ सारस्वते च ॥ अथ पुनर
त्र मातृकाया नवशक्तय उच्यंते मेधायै· प्रज्ञायै·
प्रभायै· विद्यायै· धियै· धृत्यै· स्मृत्यै· बुद्ध्यै· वि
द्येश्वर्यै· इति नवशक्तयः ॐ ह्रीं वर्णजाय सरस्व
त्यासनाय नमः । इति पीठमंत्रः एतास्तु अष्ट
सु केसरेषु अष्टौ शक्तयः नवमी तु कर्णिकायां दे
वतास्थाने एवमेव सर्वत्र नवशक्तिस्थानानि आ
सनमंत्रश्च कर्णिकायामेव इत्थं पीठं संपूज्य ।
अस्मिन् मातृकासरस्वतीं मूलमंत्रेण समावाह्य आ
वरणैः सह समर्चयेत् प्रथमं मातृकाषडंगैः प्र
थमावरणे केसरेषु समर्चयेत् । तान्यकास्तु नत्र
नत्रांगान्यसेऽत्र मंत्रमस्त्राद्यर्थे हृदयाय नमः ॥

प्र॰ च॰ सा॰ ५८

41

शिरसेनमः शिखायैनमः कवचायनमः ने
त्राभ्यांनमः अस्त्रायनमः इत्येवंप्रकारेणचतु
र्थ्यंतत्वेनसमर्चयेत् सर्वत्रांगार्चनाविधावेव
मेवन्यायः तत्रहृदयादिचतुष्टयमाग्नेयादि
कोणचतुष्टयकेसरेषु प्रवर्तितोनेत्रंचतत्स्वदि
त्वस्त्रंसमर्चयेत् क्वचित्क्वचिदन्यथापूर्वादि
दिक्षुहृदयादिविदिक्ष्वस्त्रंयथावाराह्यादिवि
धानेतंत्रसमुच्चयेत् शैवेआग्नेयेशान्यनैर्ऋत्य।
त्यादिषुहृदयादि वैस्नवेप्रागादीतिविशेषउक्त
स्त्रेणाहतैसर्वत्रैवमेवंस्थाननियमः । तत्रांगं
चास्मिन्नेवप्रपंचसारेप्राकृदीक्षापटलेहृदया
यष्टिषु प्रवर्तितोनयनंदिशांक्रमात्तत्रास्त्रंचस
मर्चयेत् क्रमादिति पुनरेतासामंगदेवतानां
रोचींषिच्यन्ते हारस्फटिककलायांजनपिंग
लवह्निरोचिषोललनाः अभयवरोद्यतहस्ता
प्रधानतनवोंगदेवताः कथिताइति ॥ क्रमदी
पिकायामप्येवमेवोक्तं तेजोरूपाणिहृदंगानि
चकेसरेषुसमभियजेत् अनलनिरृतिसमीरण
शिवदिक्षुहृदादिवर्मपर्यंत पूर्वादिदिक्षुया
स्त्रंक्रमेणगंधादिभिःसमहृष्टमनाः सत्केंदुकां

तत्कुवलयहरिनीलकुन्तलाभानप्रभाः प्रमदाः
अभयवरस्फुरितकराः प्रसन्नमुखांभोगदेवताः
स्मर्तव्या इति तत्र तेजोरूपाश्चस्य पदस्य पूर्वत्रा
न्वयः तत्र पूर्वादिदिग्नियम उच्यते पूज्यपू
जकयोर्मध्यं पूर्वमित्यभिधीयते प्रादक्षिणे
न विज्ञेया प्राच्याग्नेयादिकल्पना यत्रैव भास्वा
नुदयं प्रयाति प्राचीमिमां वेदविदो वदंति यथे
तथा पूजकपूज्ययोश्च मदागमज्ञाः प्रवदंतिते
न इंद्रादीनामपिकल्पितदिक्क्रमेणैव पूजा
क्रमः तत्र यथास्थितदिक्क्रमेण पुनः अंकं
खंगंघंङं आं नमः इंचंछंजंझंञं ईं नमः उंटंठं
डंढंणं ऊं नमः ऋं तंथंदंधंनं ॠं नमः लृं पंफं
बंभंमं लॄं नमः एं यंरंलंवं ऐं नमः ओं शंषंसंहं औं
नमः अंळंक्षं अः नमः एतेनसान्तस्थावस्वरहं
हृष्टितेन वर्गाष्टकेन द्वितीयावृत्ति पुनः ब्रह्मा
ण्यै· माहेश्वर्यै· कौमार्यै· वैष्णव्यै· वाराह्यै· इंद्रा
ण्यै· चामुंडायै· एताभिस्तृतीयावृत्तिः तत्र मात
रः सप्तसंख्याकाः किल पूजाविधये न सर्वत्रा
ष्टसंख्याकाः तस्मादत्राष्टमस्थाने महालक्ष्मीं
पूजयेत् महालक्ष्म्यै नमः इति क्वचिदन्यथासा

प्र·च·
सा·
५२

णदिविषयेब्रह्मण्यायनमः इत्यष्टमस्थाने दुर्गा
दिविषये· चंडिकायै· इत्यष्टमी अन्यत्रसर्वत्रा·
ष्टमीतत्रमहालक्ष्मीः तदुक्तं चाग्निनैवप्रबंधे
ब्रह्माणीमाहेश्वरीकौमारीवैष्णवीचवाराही
इंद्राणी चामुंडासमहालक्ष्मीश्चमातरः प्रो
क्ताइतिसर्वत्रमातृणांअष्टसंख्याकत्वंप्रागुक्तं
चाग्निनैवप्रागुक्ते त्रिगुणात्मिकायाःशक्तेःस
काशात्सर्वस्यजगतउत्पत्तिकथनप्रकारेणे
च्छाष्टधामाणुणिता तदाप्रकृतिभेदिनी अ
ष्टाक्षराऽहिवस्थाप्रणमातृमूर्त्यादिभेदिनी
इत्यष्टसंख्याकानांप्रकृत्यष्टाक्षरादीनांमध्ये
मातृणांपरिगणितत्वात् तत्रमातृणांवर्णा
दयउच्यंते ताश्चश्वेतारक्तवलयप्रक्तकथावि
ष्णवः ब्रह्माणीकनकवर्णाअक्षसूत्रकमंड·
लुवराभयधरा शूलपरशुडमरुभिकपालधरा
माहेश्वरी अंकुशादंडखट्वांगपाशधराकौमा·
रीचक्रघंटाकपालशंखधरावैष्णवी मुशल
खड्गखेटाभयधरावाराही अंकुशतोमरपाश
कुलिशधराइंद्राणी शूलकपालनरशिरः
कपालधराचामुंडाअक्षमालाबीजपूरकपा

लपंकजधरामहालक्ष्मीः पुनर्व्यापिन्या
दिभिश्चतुर्थ्यावृतिः व्यापिन्यैः पालिन्यैः क्लेदि
न्यै॰ धारिण्यै॰ मालिन्यै॰ हंसिन्यै॰ शंखिन्यै॰ इत्ये
तास्तत्कलाः पुनर्मध्ये श्राष्टवर्गानीतिमूलग्रंथ
स्य चशद्वेन चतुर्थावरणत्वेन सूचिता इतिवि
वरणकारेणक्तं पुनरिंद्रादिभिः पंचमी इंद्राय
सुराधिपतये कुलिशधरायऐरावतवाहनायस
रस्वतीपार्षदाय नमः इति पूर्वदिशि तत्तद्विशेष
णैः सहेंद्रं समर्चयेत पुनः अग्नये तेजोधिपत
येशक्तिधरायमेषवाहनायसरस्वतीपार्षदायन॰
मः यमाय प्रेताधिपतयेदंडधरायमहिषवाह
नाय सरस्वतीपार्षदायनमः निर्ऋतयेरक्षोधि
पतये खड्गधरायप्रेतवाहनायसरस्वतीपार्षदा
यनमः वरुणाय जलाधिपतयेपाशधरायन
क्रवाहनायसरस्वतीपार्षदायनमः वायवेप्रा
णाधिपतयेअंकुशधरायहरिवाहनायसरस्व
तीपार्षदायनमः सोमाय नक्षत्राधिपतयेगदाध
रायमृगवाहनायसरस्वतीपार्षदायनमः ईशा
नाय विद्याधिपतये त्रिशूलधरायवृषभवाहना
यसरस्वतीपार्षदायनमः अनंताय नागाधि

प्र॰ च॰ पतये चक्रधराय कूर्मवाहनाय स॰ रस्वतीपा
सा॰ र्षदाय नमः ब्रह्मणे लोकाधिपतये पद्मधराय
८२ हंसवाहनाय सरस्वतीपार्षदाय नमः एतानिंद्रा
दीन् लमादितत्तद्बीजपुरस्सरं उक्तविशेषणैः
सहैव सर्वत्र प्रागादिषडूर्ध्वंतास्वदिक्षु समर्
चयेत् यकारादयोष्टौ वर्णाः वाय्वंतींद्रवरुणे
श्वराणामैंद्रप्रेतेशावीजाति भुवनेशीपाशावी
जे च तत्तद्बीजयोगस्तु विवरणकारैरुक्तः तत्र
कं चास्मिन्नेव कल्पे इंद्राग्नियमनिशाचरव
रुणानिलशशिशिवाहिपतिविधयः जात्य
धिपहेतिवाहनपरिवारांताः क्रमेणयष्टव्या
इति तत्र क्वचित्क्वचिदनंतानां लोकपालाः
अस्मिन् शास्त्रेत्र अहिपतिविधय इति विध्यं
तत्वेनोक्ताः क्रमदीपिकायामप्येवमेवोक्तं
हरि हव्यवाट्तरणिजक्षपाट्वाकपतिवायु
सोमशिवशेषपद्मजान्प्रयजेत् स्वदिक्षुम
लधीरिति तत्र तु सरस्वतीपूजाविषये चेत् ।
सरस्वतीपार्षदायेति योजयेत् इतरत्र तत्तद्दे
वतापार्षदत्वेन योजयेदिति विशेषः पुनरेते
षामिंद्रादीनां रोचींषुच्यंते पीतः कृष्णापिंगः ।

धूम्रः श्वेतश्च धूम्रसितश्शुक्लाः कामार्कसूतां।
दुर्गाभालोकेशानावासवादयः प्रोक्ताः एवं क्रमे
णतेषां रोचींषि ध्येयानि क्रमदीपिकायाम
प्येवमेवोक्तं कपिशकपिलनीलश्यामल
श्वेतधूम्रश्यामलसितश्शुचिरक्ता वर्णतो वास
वाद्याः करकमलविराजत्स्वायुधा दिव्यवे।
षा विविधमणिगणाढ्यकमस्फुरद्भूषणाढ्या
इति लोकपालपूजाविधौ सर्वत्रैवमेव न्यायः
पुनस्तत्र तत्र यत्र यत्राहुतिविधौ इंद्रादिभिर्देव
श्चाहुत्यवसानमुच्यते इंद्रादिभिस्तृतीयाइं
द्रादिभिः पंचमीइति पंचावरणमीरितं इंद्रा।
दिभिः सप्तमीइति सप्तावरणमीरितं इत्याद्ये
वं प्रकारेण तत्रापि यत्र पुनः इंद्रादिभिश्चत
र्थी इंद्रादिभिः षष्ठी इत्येतावद्देवोक्ता श्चाव
रणावसानग्रहणं च न क्रियते तत्रोभयत्रप
तैर्वज्राद्यायुधवाहनपरिषत्पदादिविशेषणे।
विशिष्टानामेवेंद्रादीनां समर्चितत्वात वज्रा
दयः न पृथगावरणे समर्चनीयाः यत्र पुनरिं
द्रादिभिः पंचमी वज्रादिभिः षष्ठी इंद्रादिभि
वज्रादिभिः अष्टमी इत्याद्येवं प्रकारेण वज्रा

प्र॰ च॰
सा॰
४८

44

ग्राहुतिः पृथगेवोच्यते तत्र तत्र सर्वत्र यद्यपि व।
ज्रायायुधप्रभृतिर्विशेषयुक्ताः पूर्वेन्द्रादयः सम।
र्चिताः तथापि वज्रादयस्तु पृथगाहुतौ सम
र्चनीयाः तत्प्रकार उच्यते वज्राय शक्तये॰ दं
डाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गदायै॰
त्रिशूलाय॰ चक्राय॰ नलिनाय: एतानीन्द्रा।
दीनामस्त्राणि प्रागादिक्रमेण समर्चनीयानि
तदुक्तं चास्मिन्नेव कल्पे वज्रं शक्तिर्दण्डः ख
ड्गः पाशोऽङ्कुशो गदा शूलो रथचरणनलिन
मेते प्रोक्तान्यस्त्राणि लोकपालानां क्रमदी
पिकायामप्येवमेवोक्तं दम्भोलिशक्त्यभिध
दण्डकृपाणपाशचण्डांकुशाह्वयगदात्रिशि
खाविपद्माः अर्च्या बहिर्निजसकलद्वितमौ
लियुक्ताः स्वस्वायुधाभयसमुद्यतपाणिप
द्मा इति एतेषां रोचींषुच्यन्ते पीतहिमजल
दगगनार्चिरप्रभारक्तकुन्दनीलकचः कर
वेदारुणवर्णाः प्रोक्ताः सुवर्णतो वज्रायायु
ति क्रमदीपिकायामुक्तं कनकरजतता
यदाभधूम्रारुणहिमनील जपाप्रवालभा
सः क्रमतः इति रुचात्व वज्रप्रभृतीक रुचिरविले

पनवस्त्रमाल्यभूषा इति पंचैर्वज्रादिभिः षष्ठ्या
हृतिः एवंदिनशो मातृकासरस्वतीं पूजयेत्
अथ सकलदेवतापूजासामान्यक्रममवक्ष्ये ।
तत्र पूजा पंचविधा तदुक्तं मंत्रदेवताप्रकाशि
कायां अभिगमनमुपादानमिज्या स्वाध्याययोगा
गा इति श्रीपंचरात्रे पंचविधमभिहितं तत्र अ
भिगमनं नाम देवतास्थानमागत्य संमार्जनोप
लेपनादिनिर्माल्यहरणादिकरणं उपादानं ना
म गंधपुष्पादिपूजासाधनसंपादनं इज्या नाम
पीठपूजादिकप्रधानदेवतापरिवारदेवतापूजा
नं स्वाध्यायो नाम अर्थानुसंधानपूर्वकमंत्रज
पसूक्तस्तोत्रपाठनामकीर्तनं· तत्वप्रतिपादक
शास्त्राभ्यासश्च· योगो नाम देवतास्वरूपं स्वस्व
रूपं देवतामूर्तिरूपं स्वस्य मूर्तिरिति भावना· ए
वं पंचविधप्रकारपूजानां सालोक्यसामीप्यसारू
प्यसार्ष्टिसायुज्यरूपाणि पंचफलानि समानैश्वर्य
यथाक्रमं भवंति इत्येतत्पंचरात्रेभिहितमिति
तत्र प्रथमं प्राक् अस्मिन्नेव मातृकाविधाने आदौ
सामान्येन सकलदेवतासाधारणजपपूजारंभवि
धिरुक्तः किल तेन प्रकारेण स्वासने उपविश्य पसर्वं

प्र॰ च॰ गुरुगणपतिवंदनादिकं कृत्वा पूजामारभेत
सा॰ तत्र तावत्सकलदेवतापूजासाधारणं भावपू
५४ रणविधिः क्रमदीपिकोक्तप्रकारेण वक्ष्यते ।
अथ च सप्तविंशोमयं भस्म स्थंडिले निजमन्त्र
रविष्टरं न्यस्य तत्र विहितास्पदोभसा शंखमन्त्र
मनुना विशोधयेत् तत्र गंधपुष्पमनोज्ञनानश्चो
तिलिपेहृदयमंत्रमुच्चरन् पूरयेद्विमलपाद्य
सान्द्रधीरद्रैः पतितैः शिरोन्तकैः पीठशंख
सलिलेषु मंत्रवित् वह्निवासरनिशाकृतांक्र
मात् मंडलानि विषकं प्रवोद्यैरर्चयेद्धृदनपूर्व
दीपितैः तत्र तीर्थमनुनाभिवाहयेत्तीर्थमुलरु
चिमंडलात्मुतः स्वीयहृत्कमलतो हरितथा मा
लिनी च शिखा वयाप्रदर्शयेत् तज्जलं नयनमंत्र
वीक्षितं वर्मणामवगुंठ्य दोर्युजा मूलमंत्रसक
लीकृतं न्यसेदंगकैस्त्र कलयेद्धियोऽस्त्रधाः अ
मृतादिगुतमघ्नीकृतं संस्पृशन् जपतमंत्रमष्ट
धाः किंचन क्षिपतवर्द्धनीजले प्रोक्षयेन्निजतनुं ।
ततो मुना त्रिः करेण मनुनाखिलं तथा साधनं कु।
सुम चंदनादिकं भावपूरणविधिः समीरितो गुरा।
धयजनात्प्राणीविह गंगे च यमुने चैव गोदावरि

सरस्वति नर्मदे सिंधुकावेरि जलेस्मिन् संनिधिं
कुरु प्रथतीर्थमन्त्रः प्रोक्तोङ्कुशितौच्यतिवारणः क
निष्ठांगुष्ठकौ सक्तौ कवयो विनिवेशनं तर्जनीमथ
मातामाः संहतामध्यमसञ्जिताः मध्येद्वेषामालि
नीश्रोक्ता शंखस्योपरि चालिता इत्येतानाग्नेय्या
नामयमर्थः प्रथमं निजासनेउपविश्य तत्पुर
तो गोमयांभसा स्थंडिलशोद्धव्याच्यमंडलं विलि
ख्य पुनर्घ्यद्य देवताविषयात् जातन्मूलमंत्रस्य ये
षडंगमंत्राः तेषामंते योस्त्रमंत्रः अस्त्राय फट्।
इत्येतः तेनास्त्रमंत्रेण शंखं प्रक्षाल्य पुनस्तस्यांग
स्य हृदयस्थाने उक्ते हृदयाय नमः इत्येतेन मंत्रे
ण शंखे गंधपुष्पाक्षतानि निक्षिप्य पुनः मातृका
वर्णं प्रतिलोममुच्चार्य तदंते पूर्वोक्तांगमंत्रा।
णां मध्ये शिरःस्थाने उक्तं शिरसे स्वाहेत्येतेमं
त्रमुच्चरन् जलेन शंखमापूर्य पुनः विषमाष्ट
वाच्येन मकारेण वदन पूर्वपदवाच्यविंदुयुक्ते
नमंव वह्निमंडलाय दशकलात्मने नमः इत्येवं शं
खपीठे समभ्यर्च्य पुनः ककारेण सहितं मातृ।
काद्यासे शिरःस्थाने उक्तं अकारं तदपि वदनपू
र्वपदवाच्येन विंदुनायुक्तं वा सरकृतं मंडलपदो।

त्रं च अग्नेस्तथ मंड[...]ये द्वादशकलात्म[...] नमः
इत्येवं प्रकारेण शंखमभ्यर्च्य पुनः [...]वः गद
स्तवितं मातृकाभ्यस्ते श्रोत्रस्यान्ते [...]ककारं
तदपि वदनपूर्वपदवाच्यं विंदुलापुक्तं त्रिधा
कृत्वा मंडलपदोत्तरं च उं सोममंडलाय षोडश
कलात्मने नमः इत्येवं प्रकारेण शंखस्य ज
लेसमर्चयेत् गंगे च यमुने चैव गोदावरि सर
स्वति नर्मदे सिंधुकावेरि जलेस्मिन् सन्निधिं
कुरु इत्यनेन तीर्थमंत्रेण तीर्थमादित्यमंड
लात् शंखस्यावाह्य पुनः हृदयकमलाद्वि
ंदुं च साध्यमंत्रेण तस्मिन् जलेसमावाह्य पुनः
पूर्वोक्तानां मंत्राणां मध्ये शिखायै वषट् इत्यने
न शिखामंत्रेण गालिनीमुद्रां तस्मिन् जले प्र
दर्शयेत् गालिनीमुद्राप्रकारस्तु॰ कनिष्ठि
कांगुष्ठको मिलितौ करयोर्विततं तरमित्याद्युक्तः।
प्रकारः पुनः पूर्वोक्तानां मंत्राणां मध्ये नेत्राभ्यां
वौषट् इत्यनेन मंत्रेण तज्जलेसवीक्षयेत् तदुक्तं
ईक्षणं नेत्रमंत्रेण चेन्मूलेन मंत्रवित्। पुनः
पूर्वोक्तानां मंत्राणां मध्ये वर्मस्थाने उक्तेन कवचा
य हुं इत्यनेन कवचमंत्रेण तत्तीर्थं हस्तद्वयेन

समवगुंठ्य अथो मुखेन गृहीततर्जनीहृदयेन प
वित्रोध्वमस्तमवगुंठनमुद्राय पुनस्तीर्थदेव
तां तन्मूलमंत्रव्यापकेन सकलीकृत्य मूल
मंत्रस्यांगेरंगन्यासं च कृत्वा अस्त्राय फट् इत्यनेन
दशदिग्बंधनं कुर्यात् पुनस्तत्तादिपुके अमृत
स्वरूपीकृतं तज्जलं स्पृशन् मूलमंत्रमष्टवारं ज
पेत् पुनस्तज्जलं किंचिदुपस्थितवर्द्धनीपात्रे ।
क्षिपेत् अवशिष्टेन निजतनुं संप्रोक्ष्य पुनरप्यव
शिष्टेन तीर्थजलेन त्रिवारं मूलमंत्रमुच्चरन् गंध
कुसुमादीन् संप्रोक्षयेत् एवं पात्रपूरणविधिः
अर्घ्यादिपात्रनियमस्तु गौतमीये अर्घस्य त्रीणि
पात्राणि पाद्यस्यापि त्रयं भवेत् तथैवाचमनीया
नि पात्राणि च विभागशः तथाकरणदौर्बल्या
देकमेव प्रशास्यते विहाय शंकं सूर्यमध्ये शंखः
प्रशास्यते सर्वपूजासाधारणोयं एवं पात्रपूरणं
कृत्वा पुनस्तद्वर्द्धनीपात्रजलं शंखे किंचिन्निक्षि
प्य तेन जलेन प्रथममात्मपूजां कुर्यात् आत्मस्व
रूपस्य पुनरावाहनार्थं च तदुक्तं च शिवपूजा कल्प
नारुद्रो रुद्रमर्चयेत् नाविष्णुर्विष्णुमर्चयेदिति
पुनरपि तत्रैवोक्तं आत्मपूजां कृत्वा हृदयकम

प्र॰ च॰
मा॰
८०

47

लक्ष्यस्यंतर्यामिनः अभिव्यक्तिं संपादयेदीप्साह्ला
पांतरमिव अरण्यांमथनेनाभिव्यक्तमः निम
हवनीयादाविव हृदयकमलात् प्रतिमामा
वाहयेदिति अथात्मपूजाविधिस्तत्र समस्त
योक्तप्रकारेण लिख्यते न्यासक्रमान्निजतनौ
प्रयुंजीत पीठे हृत्पद्मे निजतन्त्रालिसमर्च्य परमह
त्मत आधारभोज्यप्रणमहांसिनिरंजनांभोरि।
ष्टां नयेत्प्राणवृत्तः क्रमविन्नदेकं आयमप्रवाणु
मेणनामसकलीकृ धांचकृत्वासनातुपयोगीः
क्रमशः समर्च्य गांधादयावनिजमूलनदतरा
यैस्त्यासक्रमात्समियजेज्जलगंधपूर्वैः मूलेन
गंधमलिमतन्तुमैशाद्यैर्मूर्तिपंजरपदेषा
णभिर्हिंघाद्भिः भालेगलेंसयुगलेहृदि पंच
मेत्रेरीशोन्नलिपतत्पदे शिवमूलतोयः मूले
नमूर्ह्निमनुनानिविलेनपंचकृत्वः किरीट।
मनुना चरयांगपाणि स्याणवात्मकेमनुरूप।
मांजलिमीश्वरे चकृत्वायजेद्धि वियदन्तर
वैरपीति प्रेतानलक्रमकृत्तोभयपार्श्वयोगा
न कुर्यात्दशेहितलसीकरवीरपद्मान् ताम्याः
न्मविल्पपत्रयधिकेषड्शोषमंशेषशिवेकृ॰

गपूर्वकमेतदिष्टं धूपं च दीपं च समर्पयेत्तस्मै निवे
द्यं तु ध्यात्वा परं चिन्त्य यथार्घ्यं दत्वार्चयित्वा पवित्रो
पचैनं लयं गतिष्ठं च समादधीत इत्यात्मपू
जायाः सम्बन्धो योऽसौ मूलग्रन्थः अस्य विवरण
मिदानीमात्माराधनमाह न्यासक्रमादिति
इहादि जन्मनीति इत्यत्र समर्च्य परं महस्त
दिति प्राक् तस्मिन्नपि विकल्पयेच्चेत्यत्र कल्प।
नामात्रं चेदिहापि कल्पनेव: तत्रावाहनादि
कृतं चेदिहापि तत्कर्त्तव्यतात्र विग्रहः कि तु
तेजोरूपमेवेति परं महस्तदिति यदेवोक्तं
मूलमन्त्रेणैव समर्चनं आधारभोज्यपाणे महासी
ति तदेवमांत्रं महोमूलाधारे हृदये पुनर्भ्रूमध्ये
ब्रह्मरन्ध्रे वा तद्दीपपद्मकर्णिकायां प्रणवा पो
रकारादिभिस्तारपुटितैर्नमोन्तैर्विहितत्यतैर्वा।
मूलमन्त्राद्यादिभिः पूजयेत् पीठपूजायां कृता
यां मूर्तिपूजां कृत्वा तस्यामाधारत्रयमपि प्राक्
पेदिभावपुनरादिमांत्रं महः पूजनीयं क्रमवि
धिदेवेन तत्सर्वमुक्तम् प्रणवतत्त्वदेवं नयेदिति
ऽन्तं प्रणवमुच्चरन् मूलाधारगतमहसोऽस्य
वाधितीवारपूकाभतयोरमनं तदानन्तमहसे

प्र॰ प॰ कीभावः ततश्च तत्तत्पर्यायाधारावयित्वयोक्रम
सा॰ ते तथा च तत्कृतेनैकीभावः पुनर्द्वादशांशाव
५८ यित्वयोक्रमतो विभावयेदिति भावः पुनर्मूल
मंत्रेण त्रिवारं प्राणायामं कृत्वा देहत्रयव्या।
पि विभाव्य व्यापककरांगादिन्यासैः सक
लीकुर्यात् गंधपूर्वैरिति दीपांतानां ग्र
हणं तत्र पुष्पानंतरं किंचित्कर्तव्यमस्तीत्या
ह मूलेनेति लिपेदिति मृदादिपदांते गंधा
दिकं तत्तलहयेन व्यापकाभिप्रायं मृदादे
र्द्विषड्भिर्मूर्तिपंजरपदे पुनर्लिपतीति संबं
धः द्वादशमूर्तिमंत्राः केशवनारायणादिमं
त्राः तत्स्थानानि च अलिककुक्ष्योर्हृत्कलह
स्यासुकानि द्वादशार्णवर्णयोगात्विद्धापी।
प्यते द्वादशार्णेति वा सद्देव द्वादशात्मनीत्य।
र्थः ऊर्ध्वपुंड्रान्वलेपनं चेतत् ईशो भालेरा
लेशो पृगालेशः दिपंचमंत्रैरन्वलिपतीति ई।
शानादिपंचब्रह्माणीह पंचब्रह्ममंत्राः तिर्य
क्पुंड्रान्वलेपनं चेतत् यदुक्तं आत्मानम
भ्यर्च्य गंधपिष्टेन लिप्यपुंड्राणि ललाट
मध्ये कंठे च चांसद्वितये सितेन हृदंतरे पं।

यथाविधमंत्रैरिति पुनर्भस्मनिक्षेपोपि कार्यः
पद्योक्तं केवलैः रुद्रादिगुह्यैश्च पादयोर्वदने भुज
ईशानादिपंचमंत्रैर्भस्मनिक्षेपेण भस्मसंत्रितं अष्ट
त्रिंशत्कलास्थानेषु षडक्षराभिरेव च जलाग्नि
रुद्रयंतेन रक्षार्थं दिक्षु निक्षिपेदिति स्नात्वा
चमनविधानानंतरमनंतरं चैवं कृत्वा गंधपि।
ष्टैरित्यायुक्तेन येन भस्मनैव सर्वविधाय पुनर
पि विधानेनाचमनं कृत्वा दहं प्राप्य पादि सर्वं का
र्यं पुनरिह चैतावद्विधेयमिति लिपरे वितिमू।
लतइति हरिहरादिषु पूर्वं गंधरस्मालेपन पूर्व
कं भालगलादिपंचस्थानेषु मूलतो नलिंपा।
दित्यर्थः दुर्गायां हरिवत् स्कंदगणपत्योः शि
ववत् इतरयोस्तिर्यक् ऊर्ध्वपुंड्र विकल्प इति
किरीटिमतंत्र नाचेति स्थाणवात्मकं गणमंत्रना
चेति अत्रापि पंचकृत्व इति संबध्यते स्थाणवा
त्मकः स्थाणुमंत्रः विविधसूक्तैर्वैदिकैरिति यजे
दित्यन्वयः विविधसूक्तवचनानि विशिष्टकुसुमा।
नि इति शाक्तोवस्यमाणप्रकारार्थः नदेवाह
श्वेतार्कणेति हरेरिति तुलसीकरवीरपद्मानि।
नाभ्यात्मचिल्लावधिकुर्यादित्यन्वयः पादन।

लादिनाभ्यंतं तुलसीद्वयं तदादिकं द्वयांतं करवी
रद्वयं तदादि चिल्ला पर्यन्तं पद्मद्वयं च कुर्यात् ।
श्वेतारुणक्रमं कृत्वोभयपार्श्वयोर्मालिति तेषां त
त्काल विशेषणं श्वेतारुणक्रमेण कृत उभयपा
र्श्वयोर्यो येषामिति समासः यथा तुलसीद्व
ये श्वेत तुलसी पादतलादिनाभ्यंतं दक्षिणभा
गे रक्त तुलसी वामभागे कुर्यादित्यादि दक्षि
णवामकरयोर्यथाई श्वेत रक्त तुलसीद्वयं पु
ष्पमादाय प्रणवोपचारम्मूलांते तुलसीद्वयं
समर्पयामि मूलमंत्रं चोच्चरन् दक्षिणवाम
पादतलादिनाभ्यंतमारोपक्रमेणारोपये
दिति एवं करवीरद्वयं पद्मद्वयमपि केषदि
निषड्भिर्मालिकुसुममालिकुर्यात् प्राग्वत् विशे
षयोजना दक्षिणकरे श्वेत तुलसी करवीरप
द्मनिचयं वामकरे रक्त तुलसी करवीरपद्म ।
निचयं चादाय तेनैव मंत्रेण चिल्लादिकेशाव
धि कुर्यादिति भावः अशेषमंगेशेषश इति · अ
शेषश इति पदं · करद्वयेनोद्भवं च कुसुमनिच
यमादाय तेनैव मंत्रेण पादतलादिकेशांत ।
मारोपयेदिति भावः श्वेतरक्त तुलस्याद्यसं ।

भवेपि तत्प्रतिपत्तै च तुलसीमात्रेणाप्येतत्का
र्यं शिवे र्क्कपुष्पपूर्वकमेतदिष्टमिति तुलसी ह
यस्थाने अर्कद्वयं पुनः करवीरद्वयं पद्मद्वयं च
एवमेतत्पुष्पपूरणमागमविद्भिः दृष्टमित्यर्थः
दुर्गायां हरिवत् स्कंदविघ्नेश्वरयोः शिववत्
हरिहरे सम्प्रदायः शास्त्रविकल्पः पुष्पेज्याना
वदेवमुक्त्वा पुनर्धूपादीज्यामाह धूपं चेति तादि
पचारान् निजमूलतद्देवताये वित्यनुवर्त्तत एव
मुद्रयैवमानसमिति विशेष्यं निवेद्य तद्व्यापरचित्त
यार्घ्यं दद्वेति शंखे जलं गृहीत्वा तल्लक्ष्मणानिवे
द्यं समर्पयित्वा संपूज्य मूलेनापीष्टा तत्प्रणवोपचा
रमूलपूर्वकं सर्वसमयमर्घ्यं समर्पयामीति स्वा
त्मनि देवतं ज्योतीरूपितदस्ते तेजसि जुह्वन्निव
तच्छिरसि विनियोगार्घ्यपात्रं समर्पयेदिति भावः
पुनर्मानसपूजां कुर्यात् अर्चयित्वेति प्रसन्नम्
ज्योक्ता परितोष्येति तां हृल्लादिसमर्प्य पुष्पाञ्ज
लिं जपमन्त्रति प्रणाममाद्यपि मनसा शक्तितो यथेष्ट
यमिति उक्तं ।लयांगानिष्टं च समादधीतेति सम्य
गिवदक्षादित्यर्थः ब्रह्मार्पणं प्रसन्नाद्यं भवसा
नीयार्घ्यं च हुत्वा लयांगेनात्मारोपणं समाप्य

प्र·च·
सा·
५·

येदिति भावः एतदुक्तं भवति सप्तदशपटले
गोपालकविधाने वक्ष्यमाणे पीठन्यासस्थाने
कृतिजदेहे पीठमंत्रैः जलगंधादिभिः समभ्य
र्च्य प्रत्यक्चितिं परिजपन् हृहहेति मूलचा
क्राद्दस्य परमात्मनि संविलाप्य मंत्रात्मताप
रिणमध्यस्थ धीईं द्वजमध्ये संयोजयेत् सा
दिमन्त्रप्रजापी सादिमनरिति प्राणवसहित
मूलमंत्रः तस्यैव शाखै· त्रिक विशाणमय दिग्र
हात्मभावक्रमात्परिणतिं विधिवद्विधाय स्तु
स्तुरीके र्चनवक्ष्यमाणन्यायेन पद्मादिस
मष्टिनिष्ठ विन्यस्य तस्मिन्नपि कल्पयेत्त्वमा
त्रं चिदानंदघनं महस्तादिति मंत्रोदये प्रोक्तं
तत्स्वरूपः कल्पमेस मर्चयेत तत्र मंत्रोदये प
विकल्पयेत् त्रयं कल्पनामात्रं चेदिहापि
पिकल्पनेव कर्तव्या तथा वाहनादिकं तं चे
दिहाप्यावाहनादिकं तात्समर्चनीयं पुन
र्मूलाधारे हृदये भ्रूमध्ये वा ब्रह्मलिंगरूपेण त
तत्स्वप्रकाशिकायां स्थानत्रये पीठं सम्पूज्या
हकाररेफईकारस्वरूपैः शक्तिपीठाधारत्रये सं
भाव्य तत्र स्थूलसूक्ष्मात्सूक्ष्मरूपात्पयथाक्र

ंनाणतेजोरूपान्ध्यात्वा अकारउकारमकारैः ता
रपुटितनमोंतैर्विह्नैरेव मंत्रैः पूजयेत् ॐ अं
ॐ नमः ॐ उं ॐ नमः ॐ मं ॐ नमः इति ॥ ततः
स्ततप्रणवमध्यवर्तनमूलाधारगतमहसः हृद
वधितीवारमूकाभतयोद्गमनं तदा तन्महसे
कीभावं च संभाव्य ततो हृदाधारगततेजस।
स्तत्तदुपरिकल्पितभ्रूमध्यधारेवाद्यवर्तिरंध्रा
धारेवा तदवधितीवारमूकाभतयोद्गमनं सं।
विभाव्य तन्महसैकीकृत्य पुनर्मूलमंत्रेण त्रि
वारं प्राणायामं कृत्वा स्थूलादिमूर्तित्रयस्य।
पेकं संभाव्य ततो मूलाधारादारभ्यब्रह्मरंध्र
पर्यंतं दंडायमानं तेजोरूपं ध्यात्वा तत्तेजः स्व
तप्रणवेन पूजयेत् पुनस्तन्महः हृदयकमले
संभाव्य अभीष्टमंत्रात्मनापरिणमय्य मूलमं
त्रेण प्राणायामत्रयं कृत्वा पुनर्मूलमंत्रेण व्याप
कत्रयकरन्यासांगन्यासापृथक्न्यासैः सकली
कुर्यात् ततः आत्मलादिपुष्पांजलीन् क्रमेण दत्वा·
ॐ नमः अं नमः उं नमः मं नमः ॐ नमः इति
समभ्यर्च्य जितं ते इत्यादि ततः पंचवारमंत्रेरभ्य
र्च्य अभीष्टमंत्रेण चाभ्यर्च्य अभीष्टमंत्रासदैरे।

प्र॰ च॰
सा॰
५१

त्तस्मात्तस्थानेषु समभ्यर्च्य अंगन्यासेन तत [illegible]
नेषु च समभ्यर्च्य आत्रयातिभूषणात [illegible]
र्च्य॰ श्रियै नमः इत्यादिनामभिरिति [illegible]
र्च्य तत्र गंधं तस्मात् लिखेत्तिलकं [illegible]
जपन् व्यापकं कृत्वा गंधेन हृदये [illegible]
र्णपूर्वकैः केशवादिद्वादशनामभिः [illegible]
दिस्थानेषु ऊर्ध्वपुंड्रं धारयेत् भालोदर [illegible]
हृत्पतले वामे तत्पार्श्वे भुजे च [illegible] वामस्य
पृष्ठककुत्सु तथा मूर्ध्नि [illegible]
ति स्थानानि द्वादश [illegible] मंत्रैः [illegible]
स्कंधयो दशस्थाने शिरसि धारयेत् शिवविष
ये ईशानादिपंचमंत्रैः भाले [illegible]
दिभस्मना तिर्यक् त्रिपुंड्रं कुर्यात् तत्र कं च
आत्मानमभ्यर्च्य स्तुगंधपिष्टेन लिप [illegible]
ललाटमध्ये कंठे च बाहुमूले [illegible]
तरे पंच पवित्रं मंत्रैरिति पुनर्भस्मना निक्षेपादि
कार्यः तत्र कं च केवलं कंठादि गृहे [illegible] यो
र्वदनेषु च ईशानादिपंचमंत्रैस्तानि विन्यसेत् तस्मै
त्रिं अष्टत्रिंशत्कलास्थानेषु आदरात्ताभिरेव च
जमात्रिनृदयं तेन रहस्यार्थं दिक्षु निक्षिपेत्

51